N.A.
Upodaghatprakanam
उपोद्घात प्रकरणम
Sanskrit
Handwritten on paper
N.A. very old
folio: 2-47 (1 missing)
13.5"X7"
Incomplete

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

यद्यपि पुनर्नागीयदेवांगभास्वारंगीपदसंगी पाणिकमलोनंगीकृतानेगधृत् ॥ अंगासंगिभुजंगभूषणप-
रोगंगातरंगावलीराजद्रम्यकुरंगलिंगशकलोत्तंसोत्तमांगो भवेत् ॥८॥ नीलकंठमुखांभोधेर्निगमागमव
र्त्मनाँनिर्गतैनैवराध्यांतैनीलकंठस्तनोत्यसौ ॥ ९॥ पूर्वाचार्यैरखिलनिगमैरागमैरुक्तमार्गाक्षुण्णातीक्ष्णैः प्र
बलमतिभिर्लब्धतत्वावबोधैः ॥ संक्षिप्योक्ताद्यकृतकवचोगुंभनैर्जंगमानां भूयोभूयादमलमनसां भूय-
सीभक्तिवृद्धिः ॥ १० ॥ शैवानागमबोधितांनश्रुतिवचोनिंद्यान्नठन्तोवदन्व्यासीयाखिलसूत्रबोधितमत-
प्रत्यर्थितादर्शिनः ॥ वेदोदीरितकर्ममार्गचरतामेतेशुवैमुख्यमप्यन्येषामधिकारितांश्रुतिमताचारस्युताचा
रिणां ॥ ११ ॥ शैवेस्मिनश्रुतिमूलत्वंव्याससूत्रानुकूलतां ॥ वैदिकाचरणीयत्वंतान्निरस्यन्प्रदर्शये ॥ १२ ॥ आगमा
नामशेषाणामुपदेष्टामहेश्वरः ॥ वेदानामपिनैतेषुयुक्तःप्रामाण्यसंशयः ॥ १३ ॥ प्रामाण्यमविशेषेणनिगमा
गमवर्त्मनाम् ॥ आगमाद्विविधाज्ञेयावेदानामविरोधिनः ॥ १४ ॥ विरोधिनश्चतत्रैतेश्रुतिमार्गानुरोधिनः ॥
कर्षणादिप्रतिष्ठांतावैदिकानुष्ठितायथा ॥ १५ ॥ तथैववीरशैवानामागमावैदिकामताः ॥ वेदाविरुद्धरूपेण
वैदिकत्वमुदाहृतं ॥ १६ ॥ यदिवेदोक्तमेवस्यवैदिकंपरमार्थतः ॥ एकादशीव्रतादीनांश्रुत्यबोधितकर्मणां ॥
॥ १७ ॥ अवैदिकत्वात्सर्वेषामननुष्ठेयता भवेत् ॥ वेदाविरुद्धानुष्ठानात्पातित्यंचापनेत्तदा ॥ १८ ॥ यद्यनुष्ठेय-
मेवस्यादेकादश्यादिकंबुधैः ॥ शैवागमास्तदाचारावैदिका-त्रैकाप्रमा ॥ १९ ॥ स्मृतिभिश्चपुराणैश्चविहिताए

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रिया० दवैदिकाः॥शैवागमेषु विहितानैवस्युर्वैदिकायदि ॥२०॥ स्मृत्युक्तावैदिकानेतिकुतस्त्वंनैवभाषसे॥वैदिका स:
२ क्रा स्तेभवेयुश्चेदागमौश्चवैदिकाः॥२१॥ अतएवाचरंतेतान्वैदिकास्सकलाबुधाः॥आलयोत्सवकर्मादीनूमुक्त
येशास्त्रवित्तमाः॥२२॥कापालादिमतान्याहुःशैवान्यन्यानियानिच॥अवैदिकानिसर्वाणिनाचरेत्तानिवैदि
कः॥२३॥शैवान्पाशुपतांश्चैवजटिलान्मुंडिनस्तथा॥लिंगिनोवृत्तिनश्चैवपाषंडान्परिवर्जयेत्॥२४॥इत्य
नेननिशिषिद्धानिधकापालादीनिवैपुनः॥वीरशैवक्रमगतानर्निद्याइतितत्कथं॥२५॥नहिंस्यादितिवा
क्येनहिंसामात्रानिषेधिते॥यागीयपशुबंधादौननिषेधोभवेत्तथा॥२६॥सर्वशब्दस्यसंकोचोधर्मतोन्य
त्रयुक्तिमान्॥यजेतेतिविधिस्तत्रनियामकउदाहृतः॥२७॥वीरशैवेतरेशैवेशैवानित्यादिनिंदितं॥शैवश
ब्दस्यसंकोचस्सर्वशब्दादिकेयथा॥२८॥नियामिकाश्रुतिस्तत्रश्रूयतेब्रह्मशः पुनः॥वेदांतसारमुख्यासुचामृ
ताख्यादिकेतथा॥२९॥अथवाशिवविश्वासश्रुतिभ्यस्तेशिवागमाः॥अधिकाश्शिववक्त्रेणसाक्षाद्देवविनि
र्गताः॥३०॥परस्पराविरुद्धार्थाःशिवोक्तानि...नागमाः॥अल्पबुद्धिभिरन्योन्यविरोधःपरिकल्प्यते॥३१॥
गमा निगमानामौनांपरमाप्तोपदेशतः॥प्रामाण्यमविशेषेणज्ञातव्यंतत्प्रदर्शिभिः॥३२॥ब्रह्मभिर्युक्तिभिस्स्पष्टं
विरोधःपरिहार्यते॥ग्रंथविस्तरभीत्याहंप्रकृतार्थमुपक्रमे॥३३॥प्रबंधस्यक्रमादेवमुपोद्घातादनंतरं २
द्वात्रिंशदुपदेशास्तेभवंतिकथिताइमे॥३४॥उपदेशेप्राथमिकेव्याससूत्रानुरोधतः॥सर्वज्ञेसर्वशक्तौचनि

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

मित्तेजगतस्तथा ॥ ३५ ॥ उपादानेचवेदांतवाक्यानां सम्यगन्वयः ॥ सर्ववेदांतवाक्यानांमुपदेशे द्वितीयके ॥
॥ ३६ ॥ स्मृत्यादिबाधेसंप्राप्तेपरिहारः प्रदर्श्यते ॥ परपक्षानपेक्षत्वंप्रपंचेनोपपादितं ॥ ३७ ॥ श्रुतिवाक्यनिषेध
स्य ॥ परिहारः प्रपंचितः ॥ जीवस्याजन्यतातस्यहेतवश्चप्रदर्शिताः ॥ ३८ ॥ तृतीयेचोपदेशेतुजीवकर्णंबृंहिते ॥ र
उपसंहरणंप्रोक्तंतदवस्थांतराणिच ॥ ३९ ॥ ब्रह्मत्वंचतथाविद्याभेदाभेदाविति क्रमात् ॥ गुणोपसंहृतिश्चापितद्गु
णानुपसंहृतिः ॥ ४० ॥ विद्यातः पुरुषार्थस्यसिद्धिस्तत्रोपवर्णिता ॥ विद्यातदंगभूत्यादिधारणासहकारिणः ॥ ४१ ॥
विधिप्रभेदमुक्तेश्चफलस्यनियमः क्रमात् ॥ साधनंचविचारश्चवर्णितः क्रमशस्तथा ॥ ४२ ॥ उपदेशेचतुर्थेतुकृतं
फलविचारणम् ॥ दंतधावनमुख्यानिकर्माणिकथितानिहि ॥ ४३ ॥ उपदेशेपंचमकेषष्ठेभस्मजनिस्ततः ॥ धारणं
सप्तमेभूतेरष्टमेतत्प्रशंसनम् ॥ ४४ ॥ रुद्राक्षोत्पत्तिरुदितानवमेदशमेपुनः ॥ धारणंतत्प्रशंसातुकथितैकादशे
क्रमात् ॥ ४५ ॥ उपदेशेद्वादशेतुपंचाक्षरजक्रमः ॥ त्रयोदशेतत्प्रशंसाशिवपूजाविधिस्ततः ॥ ४६ ॥ चतुर्दशोप
देशेस्यात्पुष्पपात्रादिलक्षणम् ॥ उपदेशेपंचदशेषोडशेतूच्यतेक्रमात् ॥ ४७ ॥ गुरुपूजाविधिस्तस्यप्रशंसाभ-
क्तिपूर्वकम् ॥ भक्तप्रशंसाकथितातथासप्तदशेततः ॥ ४८ ॥ अष्टादशेतेषुदानमेकोनेविंशकेपुनः ॥ लिंगांगसाम
रस्यंचलिंगधारणमेवच ॥ ४९ ॥ विंशोपदेशेकथितातत्प्रशंसासमासतः ॥ आद्यतत्वमहालिंगलक्षणंत्वेकविंश
तौ ॥ ५० ॥ शक्तिवैशिष्ट्यमुदितंद्वाविंशेसप्रमाणकं ॥ त्रयोविंशेगोलकादिस्खलनादिनिरूपणं ॥ ५१ ॥ चतुर्विंशेष

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

द्रस्थलोक्तिरथदीक्षाविशेषतः॥ पंचविंशेथषड्विंशेसकलध्यानमीरितं॥५२॥सप्तविंशेनिष्कलस्यध्या
नेरीतिरुदाहृता॥अष्टाविंशोपदेशेतुप्रसादग्रहणेगुरोः॥५३॥पादोदकाभिषेकश्चाप्येकोनत्रिंशकेपुनः॥
स्वतःप्रामाण्यमुदितमागमानामनुक्रमात्॥५४॥शिवधर्मप्रभावस्तुत्रिंशतीरितआदरात्॥एकत्रिंशे
समाख्याताशिवद्रोहेसमागते॥५५॥निष्कृतिःप्रायशस्तत्रद्वात्रिंशदुपदेशके॥शिवमाहात्म्यकथनेश्रव
णेभक्तिपूर्वकम्॥५६॥श्रेयःपरंप्राप्यवाप्तिःकथितोयमनुक्रमः॥द्वात्रिंशदुपदेशास्तेसंगृहीताःशिवागमैः॥
॥५७॥निरूपणीयमन्योन्यनिगमागमवर्त्मनाम्॥ऐक्यरूपंविरोधस्यपरिहारःप्रमाणतः॥५८॥वीरशैवा
गमानांतुविशेषेसैकरूपतः॥विद्याश्चतुर्दशाख्याताःवाच्यातन्त्संमतिःपुरा॥५९॥अंगानिवेदाश्चत्वारो
मीमांसान्यायविस्तरः॥पुराणंधर्मशास्त्रंच विद्याह्येताश्चतुर्दश॥६०॥शिक्षाकल्पोव्याकरणंनिरुक्तंज्यो
तिषंतथा॥छंदोविचितिरित्येतैःषडंगोवेदउच्यते॥६१॥आदिवक्ताशिवंसाक्षादेतासांपरमेश्वरः॥ऋग्वे
दोथयजुर्वेदःसामवेदोह्यथर्वणः॥६२॥ऋगेकविंशभेदास्याद्यजुष्येकोत्तरंशतम्॥सहस्रधासामवेदोन
वधाथर्वणस्मृतः॥६३॥तत्रैतेवेदपुरुषशिरांस्युपनिषद्गणाः॥श्रीरुद्रबृहदारण्यश्वेताश्वतरमुंडकाः॥६४॥कै
वल्यकालाग्निरुद्रौकठवल्लीचबाष्कलः॥हंसंपरमहंसश्चब्रह्मनारायणावपि॥६५॥कात्यायनोब्रह्मबिंदुआ
रुण्यामृतबिंदुको॥पंचब्रह्मचजाबालस्तेजोबिन्दुश्चमोद्गलः॥६६॥बोधायनीयचर्चेचश्रवणंचपराक्रमः॥

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

॥प्राच्यश्चशौनकीयंचशिवसंकल्पमेवच ॥६७॥ असुरायणमैत्रायणीयवाजसनेयकं ॥ वेदांतसारप्रवणव
ज्रसूच्यंबकास्तथा ॥६८॥ सांख्यायनीयमित्याद्यास्सर्वविद्योत्तमोत्तमाः ॥ अष्टादशपुराणानिपरिगीता
नितानितु ॥६९॥ आदौब्रह्मांडकंपाद्मंत्रितीयंवैष्णवंविदुः ॥ शैवंचतुर्थमाख्यातंपंचमंभगवत्परं ॥७०॥
षष्ठंतुनारदीयंस्यान्मार्कंडेयंतुसप्तमम् ॥ आग्नेयमष्टमंज्ञेयंभविष्यंनवमंविदुः ॥७१॥ दशमंब्रह्मकैवर्त्तं
लैंगमेकादशंमतं ॥ वाराहंद्वादशंविद्यात्स्कांदंचैवत्रयोदश ॥७२॥ चतुर्दशंवामनन्तुकौर्मंपंचदशंमतं ॥
मात्स्यंषोडशमाख्यातंगारुडंतुततःपरं ॥७३॥ अष्टादशंस्याद्ब्रह्मांडमुपपूर्वाण्यतःपरं ॥ सनत्कुमारक
थितंनारदीयंततःपरं ॥७४॥ स्कांदंसनत्कुमारेणकथितंतुततःपरं ॥ चतुर्थंशिवधर्माख्यंपुराणंनंदिनि
र्मितं ॥७५॥ तथादुर्वाससाप्रोक्तंनारदीयंततःपरम् ॥ कापिलंमानवंचैवतथैवोशनसाकृतम् ॥७६॥ ब्रह्मां
डंतुततःपुण्यंवारुणंतुततःपरं ॥ पुराणकाख्यंस्यात्कालमितंकंठाभिधानकं ॥७७॥ ततोवासिष्ठलिंगाख्यंना
म्नामाहेश्वरंचतत् ॥ ततःसांबपुराणाख्यंसुसूक्ष्ममितिचेरितम् ॥७८॥ पाराशरंचमारीचंभार्गवाख्यंततःप
रं ॥ एतान्युपपुराणानिब्रह्मज्ञानप्रदानिहि ॥७९॥ मीमांसान्यायशास्त्रंचपुराणंस्मृतयस्तथा ॥ वेदोपांगानि
मुनिभिःपरिगीतानितत्रतु ॥८०॥ पूर्वोत्तरविभेदेनमीमांसाद्विविधास्मृता ॥ न्यायकाणादभेदेनतर्कोपि

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि० द्विविधस्मृतः ॥८१॥ स्मृतयोष्टादशप्रोक्तामुनिभिर्निर्मिताःपृथक् ॥ तेषुपूर्वोमनुःप्रोक्तोबृहस्पतिरनन्त सा०
४ रः ॥८२॥ दक्षनामात्रितीयस्याद्गौतमोथयमोंगिरः ॥ योगीश्वरःप्रचेताश्चशातातपपराशरौ ॥८३॥
संवर्तोशनसौशंखलिखितावत्रिरेवच ॥ विष्ण्वापस्तंबहारीताधर्मशास्त्रप्रवर्तकाः ॥८४॥ अष्टादशापि
स्मृतयस्तन्नामपरिचिन्हिताः ॥ जाबालिर्नाचिकेतश्चस्कंदोलोगाक्षिकाश्यपौ ॥८५॥ व्यासस्सनत्कुमारश्च
शंतनुर्जनकस्तथा ॥ क्रतुःकात्यायनश्चैवजातुकर्णिःकपिंजलः ॥८६॥ बोधायनश्चकाणादोविश्वामित्र-
स्तथैवच ॥ पैठीणसिर्गोभिलश्चेत्युपस्मृतिविधायकाः ॥८७॥ अष्टादशोपस्मृतयस्तत्तन्नामभिरंकिताः ॥-
एवंचतुर्दशाख्यातावेदमार्गानुरोधतः ॥८८॥ ताल्वोष्ठपुटनिष्पंदपूर्वकंशिवभाषिताः ॥ अष्टाविंशतिसं-
ख्याकाश्शिवोक्तास्तेशिवागमाः ॥८९॥ त्रिपादार्थंचतुष्पादंप्राहतंत्रंजगत्पतिः ॥ सूत्रेणैतेनसंगृह्यप्राहवि-
स्तरतःप्रभुः ॥९०॥ कामिकादिप्रभेदेनतच्छिन्नंबहुधैवहि ॥ कामिकाद्यावातुलांताश्शिवेनोक्ताश्शिवागमाः
॥९१॥ सिद्धांताइतिविज्ञेयाउपभेदसमन्विताः ॥ कामिकंयोगजंचिंत्यंकारणंत्वजितंतथा ॥९२॥ दीप्तंसू-
क्ष्मंसहस्रंचाप्यंशुमान्सुप्रभेदतः ॥ विजयश्चैवविश्वासःस्वायंभुवमथानलं ॥९३॥ वीरंचरौरवंचेतिमकु- ४
टंविमलंतथा ॥ चंद्रज्ञानंचबिंबंचप्रोद्गीतंललितंतथा ॥९४॥ सिद्धसंतानसर्वोक्तंपारमेश्वरमेवच ॥ किरणं

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

वातुलं चैता अष्टाविंशतिसंहिताः ॥ ९५ ॥ एवमन्यानि तंत्राणि शिवेनोक्तान्यनेकशः ॥ महामायाशंबरं च योगि
नीजालशंबरं ॥ ९६ ॥ तत्वशंबरकं चैवं भैरवाष्टकमेव च ॥ बहुरूपाष्टकं चैव व्यामलाष्टकमेव च ॥ ९७ ॥ चंद्रज्ञानं
वासुकं च महासंमोहनं तथा ॥ महोच्छुष्मं महादेव वातुलं वातुलोत्तरं ॥ ९८ ॥ हृद्भेदं मातृभेदं च गुह्यतंत्रं च कामि
कं ॥ कलापादं कलासारं तथान्यत्कुब्जिकामतम् ॥ ९९ ॥ मायोत्तरं च वीणाख्यं त्रोतलं त्रोतलोत्तरं ॥ पंचामृतं रूपभे
दं भूतोड्डामरमेव च ॥ १०० ॥ कुलासारं कुलोद्देशं कुलचूडामणिस्तथा ॥ सर्वज्ञानोत्तमं चैव महाशिवमतं तथा ॥ १०१ ॥
महालक्ष्मीमतं चैव सिद्धयोगीश्वरीमतं ॥ कुरूपिकामतं चैव रूपिकामतमेव च ॥ २ ॥ सर्ववीरमतं चैव विमला
मतमुत्तमम् ॥ पूर्वपश्चिमदाक्षिण्यमुत्तरं च निरुत्तरम् ॥ ३ ॥ तंत्रवैशेषिकं ज्ञानं वीरयोगं तथापरं ॥ अरुणेशं
मोहनेशं विशुद्धेश्वरमेव च ॥ ४ ॥ एवमेतानि तंत्राणि कथितान्यपि कोटिशः ॥ सर्वासामपि विद्यानां वीरशैवं वि
शिष्यते ॥ ५ ॥ ॥ इति श्रीमद्विशिष्टाद्वैतसिद्धान्तरहस्यैकोत्तरशतस्थलाभिज्ञनीलकंठकृते निगमागमसार
मूर्ते क्रियासारे उपोद्घातप्रकरणं समाप्तः ॥ ॥

॥ श्रीगणेशाय नमः ॥ ॥ अथ [illegible] प्रमोऽर्थोपदेशप्रारंभः ॥ अथाभिधास्ये वीराणां शैवानां वेदमूलताम् ॥ व्यासनि
र्मितसूत्रार्थतत्तात्पर्यानुसारतः ॥ १ ॥ विशब्देनोच्यते विद्या शिवजीवैक्यबोधिनी ॥ तस्यां रमंते ये शैवा वीरशैवाः प्र

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि०

कीर्तिताः॥३॥विशब्दोवाविकल्पार्थोरशब्दोरहितार्थकः॥ विकल्परहितंशैवंवीरशैवं प्रचक्षते॥३॥विरो

धार्थोविशब्दस्याद्रशब्दोरहितार्थकः॥विरोधरहितंशैवंवीरशैवंविदुर्बुधाः॥४॥तत्रांमृतस्यवाक्योक्त-

लिंगधारणवैभवे॥लिंगांगसामरस्यंचफलेमोक्षंप्रचक्षते॥५॥पिंडादिज्ञानशून्यांतमेकोत्तरशतंस्थलं॥

षट्स्थलेलिंगभेदंचजिज्ञासुर्भक्तिपूर्वकं॥६॥अधिकारीसविज्ञेयस्त्यक्तसर्वेषणस्वयं॥अष्टांगयोगवान्

ज्ञानीपंचाचारपरायणः॥७॥भक्तमाहात्म्यशुश्रूषुश्चिकीर्षुर्मोक्षसाधनम्॥गुरुःशुश्रूषणरतःश्रुतवान्वी-

तकल्मषः॥८॥नगुरोःसदृशीमातानगुरोःसदृशःपिता॥संसारादुद्धरेद्योहिपरमार्थोपदेशतः॥९॥गुरू-

पसदनादेवब्रह्मविष्णादयःसुराः॥लिंगांगसामरस्यंचप्राप्नुयुर्विगतज्वराः॥१०॥सनत्कुमारप्रमुखाज्ञान

निष्ठायशस्विनः॥धृतलिंगाङ्गभावाश्चविराजन्तेनिशंमुदा॥११॥दुंडिनंदिमहाकालप्रमुखागणनायकाः॥

चतुर्दशसहस्रंहिकैलासावरणाधिपाः॥१२॥मतप्रवर्तकास्सर्वेगुरुपीठाधिरोहिणः॥महेश्वरसमीपेतेवर्त

न्तेशूलपाणयः॥१३॥अगस्त्योजैमिनिश्चैवविश्वामित्रोथकाश्यपः॥भरद्वाजोङ्गिराअत्रिर्वसिष्ठोरोमहर्षः

णः॥१४॥एतेसर्वेमहाभागाअतिवर्णाश्रमेरताः॥वीरशैवास्समाख्याताजीवन्मुक्तानसंशयः॥१५॥एषान्तुज

न्मचरमंतेषामत्रमतिर्भवेत्॥तेधन्यास्तेकुलीनाश्चशिवज्ञानप्रवर्तकाः॥१६॥यएतैःसर्वेषुलोकेषुसर्वेष-

सा०

५

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

र्गाःप्रवर्तिताः ॥ शिवएवहिसर्वेषांगुरुराद्यःपरात्परः ॥१७॥ कालेनचानवच्छेदात्सपूर्वेषांगुरुःशिवः ॥ तन्मु
खान्मद्गलितावेदाःकामिकाद्याश्चसंहिताः ॥१८॥ अन्याश्चविविधाविद्यास्तत्तत्कर्मप्रदर्शकाः ॥ तत्रदीक्षांगतो
व्यासस्तत्वज्ञानैकतत्परः ॥१९॥ पशुपाशपतिज्ञानंलब्धवांश्छिवभक्तितः ॥ शिवज्ञानानिदिव्यानिमोक्षैकफल
दान्यपि ॥२०॥ शिवेनैवोपदिष्टानितेनतानिधृतानिच ॥ ततःकृतानिसूत्राणितेनतत्वपराणिहि ॥२१॥ तेषा
मर्थाश्चनस्पष्टास्सद्गुरोरप्यदर्शनात् ॥ बहुधोल्लेखिताअर्थास्तर्कैःकर्कशभाषणैः ॥२२॥ यदैक्यंज्ञानशब्दार्थो
जीवात्मपरमात्मनोः ॥ मिथ्यात्वंजगतोरज्जुसर्पभ्रांतिवदिष्यते ॥२३॥ अविद्यावद्विषयतांशास्त्राणामितिकेच
न ॥ ब्रह्मज्ञानैकनाशंहिप्रारब्धंकर्मजंफलं ॥२४॥ इतिकेचिद्वर्णयंतिकेचिदन्यत्प्रचक्षते ॥ जीवात्मापरमात्मा
चद्वौपदार्थौव्यवस्थितौ ॥२५॥ सत्यत्वंब्रह्मणस्साक्षादनित्यत्वंविकारजे ॥ प्रपंचस्यतथासर्वसाक्षित्वंपरमेशि
तुः ॥२६॥ प्रधानतोपासनस्यमुक्तिस्सालोक्यनामिका ॥ दिव्यमंगलरूपंचपरस्यब्रह्मणोस्तिहि ॥२७॥ एवंम
तानिबहुशोभुविविस्तरितान्यपि ॥ समुपेत्यतदाव्यासःप्रार्थयामासशंकरं ॥२८॥ मतानिविविधान्येवसमु
त्पन्नानिशंकर ॥ मत्कृतानांचसूत्राणामयथानयनेकृते ॥२९॥ एवमेवेतिनिश्चित्यकुर्वन्तिकलहंमिथः ॥ त
त्प्रसादैकलब्धस्यसूत्रजालस्यशंकर ॥३०॥ यथापूर्वंत्वयाकार्यंमत्सूत्रार्थविवेचनम् ॥ इतितेनप्रार्थितस्सन्द
यालुःपार्वतीपतिः ॥३१॥ नीलकंठशिवाचार्यनाम्नाभाष्यमचीकरत् ॥ विशिष्टाद्वैतसिद्धान्तप्रतिपादनमुत्त

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

ममू ॥३२॥ मयापितस्यतात्पर्यंश्रोतृणांसुखबुद्धये ॥ कारिकारूपतस्सर्वंक्रमेणैवनिबध्यते ॥३३॥ लिंगांगसामर-
स्येकलभ्यंपाशविमोचनं ॥ शिवएवपरंतत्वंशिवएवपरंमहः ॥३४॥ शिवएवपरंज्योतिश्शिवएवपरात्परः ॥ व्या
सोक्तंयत्परंब्रह्मस्वसूत्रेषुशिवःस्वयं ॥३५॥ शिवएवहिलिंगंचलिंगरूपीशिवःस्वयं ॥ सर्ववेदांतवाक्यानांप्रति
पाद्यःशिवस्स्वयं ॥३६॥ सर्वतत्वावलंबश्चजगत्कारणमव्ययः ॥ तत्वमस्यादिवाक्यार्थस्वरूपीनिष्कलःस्वयं ॥३७॥
एवंब्रह्माद्वितीयंचसत्यंज्ञानंसुखात्मकं ॥ निर्गुणंनिर्मलंशुद्धंजनिमाख्यंनिरंजनं ॥३८॥ देवानामादिभूतश्च-
रुद्रोविश्वाधिकःप्रभुः ॥ सर्वज्ञःसर्वकर्ताचसर्वकारणमीश्वरः ॥३९॥ अनादिनिधनंवस्तुपरापरविहीनकम् ॥
परमात्मस्वरूपंचपरब्रह्मस्वरूपकं ॥४०॥ निष्ठाप्राप्यंपरंतत्वमप्रमेयमनूपमं ॥ कथयंतीतिवेदान्ताःशिवंप
रमकारणं ॥४१॥ महालिंगस्वरूपोयंशंकरस्ससदाशिवः ॥ इतिजानंतियेभक्ताःगुरोःकारुण्यतःशिवं ॥४२॥
शोकंतरंतितेसर्वेमहादेवप्रसादतः ॥ सर्ववेदांतसारंहिचिदंबरसमन्वितं ॥४३॥ पूजयेद्धृदयाकाशेस्वात्मनो
हितमाचरन् ॥ प्रकाराबहवःसंतिदहरोपासनादयः ॥४४॥ सातुकार्यावीरशैवैर्गर्भदीक्षादिसंस्कृतैः ॥ लिंगा-
ङ्गसामरस्येनशिवभावसमन्वितैः ॥४५॥ कालयोरागमार्थानुसारेणातिसमाहितैः ॥ स्फुटीभविष्यति-
स्थूलसूक्ष्ममध्यमभेदतः ॥४६॥ त्रिविधाशिवपूजापिचोदेशेचतुर्दशे ॥ साचपूजाहस्तपीठमुख्यान्यत्रापि
केचन ॥४७॥ तन्मात्रेणैवसंतुष्टश्शंभुर्निःश्रेयसप्रदः ॥ तस्यापिमूर्तयःसंतिपंचविंशतिसंख्यया ॥४८॥ ताश्चकु

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

र्वन्तिलिंगस्यपूजनंभक्तिपूर्वकं ॥ विष्ण्वादयःसुरगणाःयक्षरक्षोगणास्तथा ॥४९॥ जन्मकर्मनिवृत्यर्थंमुनयो
घृतनिश्चयाः ॥ उपासतेमहालिंगंबहवोमोक्षणार्थिनः ॥५०॥ नित्यापरोक्षविज्ञानेचिद्घनानंदरूपिणे ॥ लिंगंच
काटंजनिमेऋतंब्रह्मेडितेपरं ॥५१॥ सत्यंज्ञानंसुखंनित्यंवाद्वैकंकरणंश्रुते ॥ एवमादीनिनामानिसंतिलिंगस्य
भूरिषः ॥५२॥ तल्लिंगमेवसूत्रेषुव्यासेनापिविचारितं ॥ नीलकंठशिवाचार्यैस्तत्तात्पर्यंप्रकाशितं ॥५३॥ कलिक
ल्मषनिर्धूततत्वबुद्धिभिरन्यथा ॥ नीतंयथायथंशास्त्रंसद्गुरोरप्यदर्शनात् ॥५४॥ आमात्सर्यपरिप्राप्तमति
कौशलशालिभिः ॥ विश्रामनीयएवार्थःकथ्यतेथयथातथं ॥५५॥ अथातोब्रह्मजिज्ञासेत्यस्मिन्सूत्रेयदीरितं ॥
तद्ब्रह्मकेवलेलिंगंज्ञातव्यंचमुमुक्षुभिः ॥५६॥ समनंतरसूत्रेषुतद्गुणाएववर्णिता ॥ अनंतर्येथशब्दस्यात्तु
पूर्वकांडानुरोधतः ॥५७॥ किमनंतरमित्युक्तेवाच्यंधर्मविचारतः ॥ अनंतरियंविच्चार्यस्यब्रह्मणोलिंगरूपिणः
॥५८॥ वोंकारश्चाथशब्दश्चद्वावेतौब्रह्मणःपुरा ॥ कंठंभित्वाविनिर्यातौतस्मान्माङ्गलिकाउभौ ॥५९॥ इतिप्रामाण
तस्तत्रमंगलार्थोनयुज्यते ॥ पूर्वकांडविरोधेनाप्यङ्गाङ्गित्वनिरूपणात् ॥६०॥ ब्रह्मणालिंगरूपित्वंनयुक्तमिति
चेच्छृणु ॥ आत्मायनमआरभ्यलिंगशब्दपरंपरा ॥६१॥ प्रसिद्धतैत्तरीयोपनिषद्येवप्रदृश्यते ॥ लिंगशब्दस्यना
न्यार्थःकल्प्यस्वरसतश्रुतेः ॥६२॥ आत्मत्वेननमस्कारस्तदुक्तष्टनमस्कृतिः ॥ ततइत्यर्थसांगत्यंब्रह्मणोलिंगरूपतः
॥६३॥ अनंतरनमस्कारःकथंसंगच्छतेन्यथा ॥ तस्माल्लिंगपदस्यार्थोब्रह्मानित्यंनिरंजनम् ॥६४॥ पूर्वकांडप्रसिद्ध

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि० स्तुधर्मोग्निष्टोमपूर्वकं ॥ वीरशैवादिनैवेति चानंतर्यं कथं भवेत् ॥६५॥ वेदोक्तभूति रुद्राक्ष लिंगधारणकर्मठैः ॥ वि सा०
७ चार्यं ब्रह्मलिंगाख्यं नानंतर्यं विरुध्यते ॥६६॥ पूर्वकांड विरुद्धोर्थः पूर्वकांडोक्त उच्यते ॥ पूर्वकांडीयधर्मश्च यावद्य
त्किंचिदेव वा ॥६७॥ कृतोपनयनस्याशु वेदांतेषु प्रवेशनात् ॥ यावता कर्मणा केनाप्यनुष्ठातुं न शक्यते ॥६८॥ अ
तो यत्किंचिदेवात्र विवक्षितमुदीर्यते ॥ चतुर्णां साधनानां तु संपत्तेः समनंतरं ॥६९॥ इति केचिद्वर्णयंति तन्नाति
वोपयुज्यते ॥ इहामूत्रफलेभोगविरागः शमशालिता ॥७०॥ वेदांतार्थविचारैकलभ्यत्वादधिकारिता ॥ न संपा
दयतीत्यत्र धर्मानंतर्यमुच्यते ॥७१॥ चतुःसाधनसंपत्तिसमनंतरमेव चेत् ॥ वृतत्वाच्छास्त्रलब्धस्य जिज्ञासा
न भवेत्क्वचित् ॥७२॥ धर्मानंतर्यमेवातो वाच्यं धर्मो द्विधा मतः ॥ पशुधर्मः प्राथमिकः पतिधर्मो द्वितीयकः ॥७३॥
अनुतिष्ठन्पशोर्धर्माननुपतिधर्माननुसर्तुमर्हति ॥ यथा पिपीलिका वृक्षमूलमाघ्राय तत्फलम् ॥७४॥ आरुह्य लभते
तद्वत्पतिधर्मैकतत्परः ॥ यथा विहंगः पक्षाभ्यां फलितं वृक्षमागतः ॥७५॥ पश्यन्फलमवाप्नोति तद्वत्क्षीप्रं नदर्हे
ति ॥ यन्नित्यमपरोक्षं च ज्ञानं मोक्षैकसाधनं ॥७६॥ पशुधर्म इति प्राहुर्यस्तु काम्यफलप्रदः ॥ निष्कामेन स्वपाप+
स्य विच्छित्त्यै समनुष्ठितः ॥७७॥ यो धर्मस्तं तत्र शास्त्रेषु पतिधर्मं प्रचक्षते ॥ दशेंद्रियाणि विहितो धर्मः काम्यस्स एव
हि ॥७८॥ निष्कामसमनुष्ठानात्पतिधर्मत्वमप्ययेत् ॥ तत्रापि सर्वकर्मादावधिकारप्रदायकं ॥७९॥ भस्मधारणमु ७
ख्यं हि कालाग्न्युपनिषन्मुखैः ॥ बृहज्जाबालमुख्यैश्च विहितं तत्पदे पदे ॥८०॥ रुद्राक्षधारणं चैव दहरोपासनादिकं ॥

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

कालयोश्शिवपूजाचत्रिषुकालेषुवासदा ॥८१॥ विद्यासुश्रुतिरुत्कृष्टारुद्रैकादशिनीश्रुतौ ॥ तत्रपंचाक्षरोमंत्रश्शि-
वइत्यक्षरद्वयं ॥८२॥ इतिश्रुतिशिरोरत्नशिरोरत्नमनोर्जपः ॥ आच्यार्येदेवइत्युक्तमंत्रदेशिकपूजनं ॥८३॥ प्रसाद
ग्रहणंतस्येत्याद्याःपाशविमोचकाः ॥ पतिधर्मादिमेज्ञेयास्तदानंतर्यमत्रच ॥८४॥ अतशब्दोत्रहेत्वर्थःसर्वे[illegible]षां
नविशिष्यते ॥ विषयोस्तुद्वयोरैक्यंजीवस्यब्रह्मणस्तथा ॥८५॥ विरुद्धयोःस्वभावेनतमस्तेजस्समानयोः ॥ युष्म
दस्मद्गोचरयोःकथमन्योन्यताभवेत् ॥८६॥ किंचिज्ज्ञत्वंचजीवत्वेसर्वज्ञत्वेतदन्यता ॥ अनित्यत्वंचनित्यत्वेकथमे
कत्रयुज्यते ॥८७॥ इतिचेद्दीयतांदृष्टिस्तत्वेर्थेसावधानताः ॥ इदंरजतमित्यत्रतज्ज्ञानेशुक्तौभ्रमात्मके ॥८८॥
इदंत्वांशेनशुक्तित्वेरजतत्वमनंतरं ॥ उभयेचयथाशास्त्रेविरुद्धंचपरस्परं ॥८९॥ शुक्तित्वेचप्रकारेतुरजतत्वंनि
वर्तते ॥ तद्वदेवात्रसर्वज्ञेकिंचिज्ज्ञत्वंविशिष्यते ॥९०॥ सर्वज्ञत्वेप्रकारेतुकिंचिज्ज्ञत्वेनिवर्तते ॥ तज्जीवब्रह्मणोरैक्यं
शास्त्रस्यविषयंविदुः ॥९१॥ मुक्तिःसाधारणत्वेनप्रयोजनमुदीर्यते ॥ नजीवब्रह्मणोरैक्यंसूत्रस्वरसतस्फुरेत् ॥
॥९२॥ इतिव्याचक्षंशेशशक्तिविशिष्टंविशयस्त्विति ॥ यथाघटइतिज्ञानेघटत्वेस्याद्विशेषणं ॥९३॥ तथाब्रह्मणि
यं वैशिष्ट्यंशक्तेरित्यवधा[illegible]तां ॥ अग्निःस्फुलिंगयोर्नास्तियथाभेदःस्वरूपतः ॥९४॥ अग्नित्वेनकणत्वेनभेदोपि
ल स्फुरतिक्वचित् ॥ यथाहिकुंडमितिभेदाभेदौतथात्रच ॥९५॥ तस्माच्छक्तिविशिष्टस्यजिज्ञासाब्रह्मणस्फुटं ॥ षट्
स्थलज्ञानमप्यत्रमोक्षसाधनमुच्यते ॥९६॥ लिंगमेवयतःशास्त्रेब्रह्मेतिसुविचार्यते ॥ सर्वत्रलिंगसंबंधंकुर्वंति

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

प्रतिपत्तये ॥९७॥ सर्वं ब्रह्मेतिवेदार्थमनुसंधाय शांभवाः ॥ ब्रह्मलिंगं जनिमचेत्याद्यायेनसमार्थकाः ॥९८॥ माध्व
बौद्धादिचार्वाकमताध्वाध्वन्यतामेयत्त् ॥ गणाचारविरुद्धं स्यान्नस्मार्तनितितन्मते ॥९९॥ नीलकंठशिवाचार्यभा
ष्यार्थमनुसंदधन् ॥ वीरशैवैरभिमतमभिधास्यश्रुतेर्मतं ॥१००॥ तस्माद्धर्मविचारस्य पश्चाद्ब्रह्मैवकेवलं ॥ विचार्यं
श्रवणाद्यैश्च शांतिमद्भिर्जनैःसदा ॥१०१॥ अनेकजन्मसिद्धानां श्रौतस्मार्तानुवर्तिनां ॥ नराणां क्षीणपापानां शिवे
भक्तिः प्रजायते ॥१०२॥ अग्निष्टोमादयो यज्ञा अश्वमेधावसानकाः ॥ सर्वे ते शिवभक्त्यर्थं निश्चितां वेदशास्त्रयोः ॥
॥३॥ कृतपुण्यजनास्सर्वे भक्तिं प्राप्य महेश्वरे ॥ प्राप्नुवंति परं धाम जीवन्मुक्ताश्च ते बुधाः ॥४॥ यदा चर्मवदाकाशं
वेष्टइष्यंति मानवाः ॥ तदा शिवमविज्ञाय दुःखशांतो भविष्यति ॥५॥ शिव एव परं ब्रह्म सच्चिदानंदलक्षणं ॥ तदन्यन्न
परं किंचित्तदतो ध्येयमास्तिकैः ॥६॥ सर्वमन्यत्परित्यज्य शिवादन्यत्तु दैवतं ॥ शिव एव सदा पूज्यो मुमुक्षुभिरहर्निशं ॥
॥७॥ अयमेव हि सिद्धांतः सर्ववेदेषु नान्यथा ॥ तस्माल्लिंगं ब्रह्मशैवमुपास्यं च मुमुक्षुभिः ॥८॥ कैवल्यमेव सर्वेषां जाय
ते न पुनर्भवः ॥९॥ ततो ह्युपनिषच्छास्त्रं विचार्यं शुद्धमानसैः ॥ लिंगे सुषुप्तिरित्येतैस्सुखं लिंगवतो परं ॥११०॥ आल
स्यादितथान्यत्र प्रतिपादितमित्यथ ॥ नमो ब्रह्मण इत्याद्यैस्तदेव हि दृढीकृतं ॥१११॥ लिंगस्थापनमित्यादौ शतशः प्र
तिपादितं ॥ सर्वं ह्युपनिषच्छास्त्रं प्रवृत्तं वर्णितुं शिवं ॥११२॥ तथापि मानवा मूर्खास्तत्यजुर्लिंगधारणं ॥ आचारो विप ८
रीतो हि युगधर्मानुसारतः ॥११३॥ धनी ह्युदररोगस्थो न भुंक्ते ह्यन्नमुत्तमं ॥ तद्वत्तात्त्विकशास्त्रार्थमतिर्नादि निष्कस्यचि

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

तू॥१४॥शिवप्रसादसिद्धार्थाःकृतकृत्यास्तुयेनराः॥धृतलिंगाङ्गभावाश्चभविष्यंतिगतज्वराः॥१५॥अथातोब्रह्म
जिज्ञासेत्यारभ्यव्याससूत्रके॥अनावृत्तिरितिहेतदंतेब्रह्मविचारिते॥१६॥धार्यंनिश्चित्यविद्वद्भिर्गुरुविश्वासतत्परैः॥
रहस्योपनिषद्वाक्यैर्वर्णितंब्रह्मकेवलं॥अपरिच्छिन्नविभवमवाङ्मनसगोचरं॥१७॥निष्कलंनिर्मलंशुद्धंनिर्विकल्पं
निरंजनं॥१८॥ज्ञात्वाकथमुपास्यंहिनिरस्तद्वैतलक्षणं॥लक्षणेनप्रमाणेनवस्तुसिद्धिरुदाहृता॥१९॥जन्मादिकार
स्व न णत्वंहिजगतांब्रह्मलक्षणं॥सर्ववेदांतवाक्यानिप्रमाणानिसंशयः॥२०॥एतैरापाततोब्रह्मनिश्चित्यश्रवादिभिः॥ णा
ब्रह्मैवसन्ब्रह्मवैतियएवंवेदमानवः॥२१॥द्वितीयसूत्रंव्यासेनह्यस्मिन्नर्थेसमर्थितं॥जन्माद्यस्ययतःसूत्रेविष्णो
राद्यस्यजन्मयत्॥२२॥तच्छंभोर्ब्रह्मणःसाक्षाज्जगत्कर्तृत्वमिष्यते॥अथवाकारवाच्यस्यविष्णोर्जन्मादियच्छि
वात्॥२३॥सर्वप्रपंचहेतुत्वंलक्षणंब्रह्मणोविदुः॥यतोवेत्यादिवाक्यानांविषयत्वमुदाहृतं॥२४॥वाक्यस्वारस्ययो
गेननिश्चितंब्रह्मधारणं॥यस्मात्सर्वमिदंब्रह्मविष्णुरुद्रेन्द्रपूर्वकं॥२५॥सहभूतेन्द्रियैःसर्वैःप्रथमंसंप्रसूयते॥
एषदेवोमहादेवोविज्ञेयःसमहेश्वरः॥२६॥नतस्यपरमंकिंचित्पदंसमधिगम्यते॥अनेनचित्रकृत्येनप्रथमं
सृज्यतेजगत्॥२७॥अंत्यकालेपुनश्चेदमस्मिन्प्रलयमेष्यति॥कारणानांचयोधाताधातापरमकारणम्॥२८॥
नसंप्रसूयतेन्यस्मात्कुतश्चनकदाचन॥ससर्वैश्वर्यसंपूर्णोनाम्नासर्वेश्वरःस्वयं॥२९॥सर्वैर्मुमुक्षुभिर्ध्येयःशं
भुराकाशमध्यगः॥अयमेवशिवःकर्तापुरुषःकारणंपरं॥३०॥विष्णुर्ब्रह्माशशीसूर्यःशक्रोदेवाश्चसान्वयाः॥

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि० सृज्यते ग्रसते चैव तमोभूतमिदं जगत् ॥३१॥ अप्रज्ञानं जगत्सर्वं तदाह्येको महेश्वरः ॥ यदा तमस्तदा देवमध्यास्ते सा०
९ परमेश्वरः ॥३२॥ ब्रह्मविष्णादिकान्सर्वान्सृष्ट्वादौ परमेश्वरः ॥ चकार दीक्षां तेषां च वीरशैवागमाच्छिवः ॥३३॥ लिं
गाङ्गसामरस्येन कृतकृत्याश्च ते बभुः ॥ तदाप्रभृति विष्णाद्याः शिवस्य परमात्मनः ॥३४॥ आज्ञया शक्तिमंतश्च
लोकेषु ख्यातिमाप्नुयुः ॥ यस्याज्ञया जगत्स्रष्टा विरिंचिः पालको हरिः ॥३५॥ संहर्ता कालरुद्राख्यः शिव सांबः सना
तनः ॥ घृतरीति घनीभूतः सच्चिदानंदलक्षणः ॥३६॥ अणोरणीयान्सर्वात्मा महीयान्महतः प्रभुः ॥ कर्ता पाता च
संहर्ता ब्रह्माविष्णुहरप्रभुः ॥३७॥ अविनाभूतचिच्छक्ति विस्फुलिंगाग्निवत्स्मृतः ॥ नात्यंतभेदभावो हि न चाभे
दो न चोभयं ॥३८॥ भेदाभेदौ किंतु जीवब्रह्मणो मिश्रितौ पुरा ॥ श्रुतिस्मृतिपुराणानि कामिकाद्यास्तथागमाः ॥३९॥
उपसनाभिगम्यं हि भेदाभेदस्वरूपकं ॥ शिवमेव सदा सांबं हृदि कृत्वा ब्रुवंति हि ॥४०॥ एतज्जगत्कारणत्वे हेतुः
शास्त्रप्रधानतः ॥ शास्त्रयोनिर्यस्य तस्य शास्त्रयोनित्वमिष्यते ॥४१॥ शास्त्राणामथवा योनिरिति तत्वविदां स्थि
तिः ॥ ब्रह्मणः शास्त्रयोनित्वात्तत्रोपनिषदां गणः ॥४२॥ विषयत्वेन निर्णीतो विषयो ब्रह्मधारणं ॥ एतेषां ब्रह्मवाक्या
नामन्वयो ब्रह्मनिःस्मृतः ॥४३॥ समन्वयात्तु ब्रह्मैव धार्यं पूज्यं मुमुक्षुभिः ॥ विषम्य द्योतनार्थो यस्तु शब्दोयं प्रकाशि
तः ॥४४॥ तस्माद्विषयवाक्यानि बव्हार्थानि न संशयः ॥ तत्रैकार्थमुदाहृत्य स्वस्वबुद्ध्यनुसारतः ॥४५॥ लोका मुह्यंति स ९
तते विवदंतः परस्परं ॥ पुनः संसारचक्रेस्मिन्भ्रमंति परिमोहिताः ॥४६॥ कण्वादिकृतशापाश्च परतंत्राजना भुवि ॥

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

साधुमार्गंपरित्यज्यमार्गान्तरमुपासते॥४७॥तेसर्वेतप्तनरकेपतंतिसततंध्रुवं॥किमत्रबहुनोक्तेनमानुषंजन्मदु
र्लभं॥४८॥तत्रापिदुर्लभंजन्मकुलेशैवस्यकस्यचित्॥वीरशैवान्वयेजन्मपरमंदुर्लभंस्मृतं॥४९॥तत्राजातानरांस
र्वेवीरशैवानरोत्तमाः॥विष्ण्वादिदेवसंघानांरक्षकत्वात्सदाशिवः॥५०॥वीरस्सतुसमाख्यातस्तल्लिंगंशिवउच्यते॥
वीरलिंगंसमभ्यर्च्यतत्स्वरूपंप्रयांतिते॥५१॥येवीरशैवालोकानांनित्यंक्षेमाभिलाक्षिणः॥त्रिपुंड्रावलिभिर्दीप्तारु
द्राक्षस्रगलंकृताः॥५२॥शिवलिंगार्चनपराःशिवभक्तप्रपूजकाः॥पंचाक्षररतानित्यंगुर्वाराधनतत्पराः॥५३॥कीर्त
नीयाश्चवंद्याश्चदर्शनीयाःप्रयत्नतः॥शिवलोकाच्चगलितास्तेशिवानात्रसंशयः॥५४॥लिंगांगसामरस्येनजीवन्
मुक्तास्समाहिताः॥तस्मात्सर्वप्रयत्नेनलिंगंधार्यंमनीशिभिः॥५५॥शिवस्वरूपलाभायपशुपाशनिवृत्तये॥तल्लिंग
धारणंमुक्त्वामुक्तिमिच्छतियःपुमान्॥५६॥विषपानेननित्यत्वंकुरुतेस्वात्मनोहिसः॥योलिंगधारणंमुक्त्वापशुशा
स्त्ररतोभवेत्॥५७॥करस्थंपायसंत्यक्त्वाकूर्परंलेढिचात्मनः॥अथातोब्रह्मजिज्ञासाजन्माद्यस्ययतःशिवात्॥५८॥
तस्मात्तच्छास्त्रयोनित्वाद्भूयस्तत्तुसमन्वयात्॥वेदांतप्रत्ययन्यायमंशांशित्वमधात्स्वयं॥५९॥अंशोनानेतिन्याये
नतदेवपरिकीर्त्यते॥शिवांशाब्रह्मविष्ण्वाद्याअंशीदेवःशिवःस्मृतः॥६०॥सर्वोपास्योमहादेवःसर्वेचोपासकास्स्मृताः॥
म। कथंतयोःप्रभेदोहिजीवात्मपरमात्मनोः॥६१॥सर्वज्ञत्वादयोधर्माःशिवस्यपरमात्मनः॥किंचिज्ज्ञत्वादयोधर्माजीवाना-
मितिनिश्चिते॥६२॥अभेदःकथमत्यंतंभेदाभेदौव्यवस्थितौ॥ब्रह्मणःशास्त्रयोनित्वंकथंतन्नभवेन्निजे॥६३॥आम्ना-

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि० यस्यक्रियार्थत्वादक्रियत्वाच्छिवस्यतत्॥ब्रह्माक्रियायाःकर्त्रादिप्रकाशनमतोनच॥६४॥इतिचेत्तत्रवक्ष्यामस्समन्वय- सा०
१० निरूपणं॥वेदांतैरवगम्यंतेसर्वज्ञत्वादयोगुणाः॥६५॥वेदांतेषुचवाक्यानिसमन्वयदृढानिहि॥एतेनशास्त्रयोनित्वंब्र
ह्मणोदृढमिष्यते॥६६॥इक्षतेर्नाशब्दमितिहितदारभ्यकेवलं॥प्रथमाध्यायपर्यंतंसमन्वयइहोच्यते॥६७॥सदेवेत्या
दिवाक्यानिश्रूयंतेतत्रतत्रतु॥तच्छब्देनचकिंब्रह्मप्रधानंवेतिसंशयः॥६८॥किंतावत्प्राप्तमधुनाप्रधानमितिकथ्य
न॥अचेतनस्यजगतउपादानमचेतनं॥६९॥मृद्दृष्टांतानुसाराश्चचेतनेनविलक्षणं॥तच्छब्देनपरब्रह्मगृह्यतेह्या
त्मशब्दवत्॥७०॥इक्षतेर्ब्रह्मधर्मत्वान्नप्रधानस्ययुज्यते॥अशब्दंहिप्रधानंतन्नहिद द्वाचकःश्रुतः॥७१॥उक्तो
मृदादिदृष्टांतोविषमोनैवयुक्तिमान्॥तत्तेजऐक्षतेत्यादौतेजइत्योपचारिकं॥७२॥एवंगौणंप्रधानेपिचेक्षणंहि
तवोच्यते॥गौणश्चेन्नात्मशब्दादित्येतत्सूत्राद्दृढीकृतं॥७३॥आपस्तेजसोरीक्षणंहिगौणंयुक्तंनचेतरत्॥इहसच्छब्दवा
च्यस्यचेक्षितुर्मुख्यमीक्षणं॥७४॥आत्मशब्दपरामर्शात्सआत्मेत्यादिवाक्यतः॥आपस्तेजसोरपितथामुख्यमेवक्ष-
णंभवेत्॥७५॥तदीक्षणाभिधानेहिचेश्वरस्याभिमानिनः॥यथाराज्ञोह्यात्मशब्दोभृत्येसर्वार्थकारिणि॥७६॥त
थाप्रधानेसच्छब्दोयुज्यतेवीक्षणंचतत्॥तन्निष्ठस्यचमोक्षोत्रह्युपदेशाद्विधीयते॥७७॥तन्निष्ठाब्रह्मनिष्ठाहि
तेवैमोक्षाधिकारिणः॥तस्मात्प्रधानमितिचयदुक्तंतन्मृषाभवेत्॥७८॥जगतःकारणंब्रह्मचोपास्यंहिमुमुक्षुभिः॥ १०
नायमात्मेतिवाक्येनशिवस्यवरणंतनोः॥७९॥वरणंनामतद्रूपधारणंविधिमार्गतः॥लिंगाङ्कृत्यादिवाक्येनमोक्षमा

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

गैतत्परः॥८०॥अमृतस्येतिवाक्येनधारणंप्रतिपादितं॥तन्निष्ठास्त्वेवमनुजाअतिवर्णाश्रमेरताः॥८१॥तएवहिम-
हात्मानोब्रह्मनिष्ठाउदाहृताः॥लिंगाङ्गसामरस्येनब्रह्मभावमुपाश्रिताः॥८२॥सारूप्यरूपिणींमुक्तिंसंप्राप्यपरादु
र्लभां॥कृतकृत्याभवंत्येवशिवानंदभुजोनिशं॥८३॥अथोमित्यादिवाक्येननिश्चितंलिंगधारणं॥तन्मोक्षसाधनं
पुण्यंतद्धार्यंहृदयांबुजे॥८४॥अतस्तच्छब्दवाच्यंहिब्रह्मैवतुनसंशयः॥तच्चिच्छक्त्याविनाभूतंजलशैत्यमिवोदि
तं॥८५॥मायाप्रधानमित्येतद्युक्तियुक्तंनचाभवत्॥अजामंत्रेणचिच्छक्तियुक्तस्यपरमात्मनः॥८६॥लीलयाज-
गदुत्पत्तिस्तिरोधानंपुनःप्रभोः॥कठकैवल्यमांडूक्यप्रश्नाद्युपनिषत्सुच॥८७॥वेदांतसारप्रणववज्रसूच्यादि-
कासुच॥प्रकाशितार्थाःसर्वेचविस्मृताःकैश्चिदप्यहो॥८८॥अतदर्थानिश्चिताश्चमोहादन्यायतत्परैः॥अनेन-
किंबहूक्तेनसूत्रार्थोद्वयमेवहि॥८९॥अत्रायमवधेयोर्थःसूत्रस्वरसतस्ततः॥ब्रह्मजिज्ञासितंलिंगंशिवतत्वंश्रुती
रितं॥९०॥समनंतरसूत्राणांत्रयाणांसौत्रशब्दतः॥तात्पर्यंवीरशैवोक्तपदार्थेष्वेवदृश्यते॥९१॥तथाहिजन्मलो-
कानांस्थेमसंहारकर्मणि॥यतोहिब्रह्मणस्तस्यब्रह्मत्वमितिलक्षणं॥९२॥यतोवेत्यादिविषयवाक्येनतदलंकृतं॥
तत्रतावदियानुभेदःसूत्रीयपदभंजने॥९३॥जन्माद्यस्ययतश्चेतिपदद्वयमिदंततः॥पिंडादिज्ञानशून्यांतस्थल-
स्यैकशतस्यतु॥९४॥यतस्सकाशादित्येतद्ब्रह्मलक्षणमुच्यते॥सृष्टिवाक्यविरोधोपिपूर्वमेवनिराकृतः॥९५॥
यतश्चस्थलभेदेनप्रोच्यतेस्थितिसंहृती॥स्थीयंतेसर्वतत्वानिलीयंतेतत्रतत्स्थले॥९६॥स्थितिसंहारसापेक्षंज

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि० न्मचतित्रयंस्थलं॥ यतोवेत्यादिविषयवाक्यार्थासुगुणेनहि॥१७॥ विस्तार्यस्थलशब्देनकामिकादौविचार्यते॥ः सा०
११ अथवाकार्यवाच्यस्यविष्णोर्जन्मयतःशिवात्॥१८॥ अथर्वशिखयाचोपनिषदायंसमर्थितः॥ शास्त्रशासनक
र्तृत्वाद्योनित्वात्तुततःपरं॥१९॥ आकारवाच्योविष्णुस्तद्योनित्वंकारणात्मकं॥ लिंगनियामकंतत्त्वंसूत्रतात्पर्यतः
श्रुतं॥२००॥ शास्त्रंयोनिर्यस्यतस्यशास्त्रयोनित्वमेववा॥ शास्त्राणांयोनिरित्येवमस्माकंतत्समंजसं॥२०१॥ सर्वा-
र्थसाधनोपायाःसंतिसर्वागमेषुच॥ तथापिविवशामर्त्यायच्चकिंचिद्वदंतिहि॥२०२॥ एषारीतिःसर्वसूत्रसंम-
ताचव्यवस्थिता॥ अन्याश्चरीतयःसर्वानसूत्रानुगुणाःकृताः॥२०३॥ ब्रह्मण्यध्यासइतियज्जगतामिष्यतेपरैः॥
असूत्रितंतुतत्सर्वमज्ञानपरिकल्पितं॥ मूढामुह्यंतिसततंयेविनामार्गमुत्तमं॥२०४॥ ननतर्ह्युच्यतेब्रह्मवेदेत्या-
दिविधानतः॥ एकंब्रह्मविद्ब्रह्मैवस्याद्विद्येत्यादिवाक्यतः॥२०५॥ अभेदएवकथितोभेदाभेदःकथंभवेत्॥ इतिचे
न्नब्रह्मवेदब्रह्मैवभवतीतियत्॥६॥ उपासनांगंतदितिनिर्णीतंश्रुतिसूत्रयोः॥ तन्निष्ठस्यैवमोक्षोत्रह्युपदेशाद्धु
वंपरं॥७॥ ब्रह्मैवसच्छब्दवाच्यंतस्मादन्यन्नचाभवेत्॥ हेयत्वावचनाच्चैवस्वाप्ययादपिनेतरत्॥८॥ अप्ययोग
तिसामान्यंब्रह्मण्येवेतिनिश्चितं॥ श्रुतत्वाच्चप्रधानादेर्नहेयत्वंकदाचन॥९॥ आनंदमयशब्दःकिमभ्यासात्तैत्ति
रीयके॥ आत्मानमथजीवंवागृह्णातीत्यत्रसंशयः॥२१०॥ प्रियाद्यवयवादीनांयोगाज्जीवान्नसंशयः॥ इतिचेद्भृ- ११
गुवल्यांचपरमात्मैवनिश्चितः॥११॥ आनंदमयोब्रह्मैवह्यभ्यासात्पक्षरूपकं॥ प्रियाद्यंगत्वयोगोहिवास्तवोनविव

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्षितः ॥१२॥ आनंदवल्यांतद्योगोबुद्धिदार्ढ्यायकल्पितः ॥ विकारार्थेमयट्स्वार्थेप्राचुर्यर्थेथवापुनः ॥१३॥ नायंम
यड्विकारार्थेपूर्वोत्तरविरोधतः ॥ तूष्णींप्राणादिशब्देनह्युपक्रमइहोदितः ॥१४॥ उपसंहारवाक्येषुयमदंडःप्रकीर्ति
तः ॥ तस्मात्स्वार्थेमयट्प्रायोभृगुवल्यांचनिश्चितः ॥१५॥ विकारशब्दान्नेतिचेन्नप्राचुर्याद्ब्रह्मकेवलं ॥ अन्नप्राणा
दिशब्दैश्चप्राचुर्याद्वानचेतरः ॥१६॥ तस्मान्मात्सर्यमुत्सार्यविचार्येलिंगधारणं ॥ इतश्चनविकारार्थेस्वार्थएवेतिनि
श्चिते ॥१७॥ सत्यज्ञानादिमंत्रैश्चसूत्रब्राह्मणवाक्यतः ॥ मंत्रब्राह्मणयोरैक्यादन्यस्यानुपदेशतः ॥१८॥ ब्रह्मैवानंदशब्द
स्यवाच्यंनान्यदितिध्रुवं ॥ मांत्रवर्णिकमेवात्रगीयतेतैत्तीरीयके ॥१९॥ तद्धेतुव्यपदेशाच्चमांत्रवर्णिकगानतः ॥ तदे
वानंदयातीतितद्धेतोस्तत्कथंभवेत् ॥२०॥ इतश्चपरमेवात्रब्रह्मानंदमयःश्रुतः ॥ अन्योन्तरात्मानंदमयइतिवाक्ये
नकेवलं ॥२१॥ अन्यस्यचांतरस्यात्रनोपदेशात्परंश्रुतं ॥ प्राप्यस्यान्यस्याश्रवणाच्छ्रुतहानिश्रुतौभवेत् ॥ नेतरोनुप
पत्तेश्चश्लोकत्वप्रतिपादनात् ॥२२॥ परंब्रह्मानंदमयोजीवोनेतिव्यवस्थितः ॥ तद्भेदव्यपदेशाच्चब्रह्मानंदमयःपरं ॥
ना ॥२३॥ तस्माद्वाइतिवाक्येनविज्ञाच्छिन्नईश्वरः ॥ अन्योंतरादिवाक्येनह्यानंदमयइष्यते ॥२४॥ कामाच्चनानुमानेचप्र
धानंभवतीतियत् ॥ तदपेक्षानात्तिवाक्येकामानाश्रवणाज्जडे ॥२५॥ तस्मिन्नस्यचतद्योगंशास्त्यानंदमयःपरः ॥
नसंसारिप्रधानेवाकुतोस्मिन्योगशासनात् ॥२६॥ यदाह्येवैषएतस्मिन्नितिवाक्येनंश्चिते ॥ अभयंपरमोमोक्षस्तद् नि
ज्ञानेसावधानता ॥२७॥ परंब्रह्मानंदमयःप्राप्येधार्येहृदंबुजे ॥ अंतस्तद्धर्मोपदेशादितःपूर्वविचारिते ॥२८॥ जीवाना-

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि० मितितत्सर्वंनिश्चितंब्रह्मधारणं॥इतःपरंतुदेवानांविचार्यंब्रह्मधारणं॥२९॥आदित्यमंडलेतिष्ठन्जगदीशःप्रचो सा०
१२ दयात्॥तथाक्षिण्यपिदेवेशउपास्योनेत्तरोभवेत्॥३०॥भेदव्यप देशान्यःपरमात्मेतिनिश्चितं॥यआदित्ये चा
ना तिवाक्यैष्युपास्यःपरमेश्वरः॥३१॥तथाकाशस्यलिंगाच्चइहाकाशोब्रह्मकेवलं॥तथातएवप्राणाश्चब्रह्मैवभवति
श्रुतं॥३२॥ज्योतिश्चरणाभिधानाज्जोतिर्ब्रह्मनभौतिकं॥छंदोभिधानान्येति नेत्यादिसूत्रेणशाश्वतं॥३३॥गा
यत्र्याख्यंपरंब्रह्मधार्यंध्येयंहृदंबुजे॥तथाचेतोर्पणगदाच्छ्रुतिर्दर्शयतीतिहि॥३४॥चेतोर्पणंधारणंचहृदयांभो
जमध्यमे॥बहुषुश्रुतिजालेषुसम्यगेवोपपादितं॥३५॥स्थानानांमुत्तमेस्थानेहृदब्जमितिनिश्चितं॥एवंभूतादि
पादेतिसूत्रेणप्रतिपादितं॥३६॥उपदेशेतिसूत्रेणजोतिशब्दोनिरूपितः॥प्राणस्तथानागमाद्भिनानालिंगान्न-
संशयः॥३७॥परब्रह्मप्राणशब्दान्नमुख्यप्राणोनचाभवत्॥वक्तुरात्मोपदेशाद्धिप्राणशब्दोनचस्मृतः॥३८॥अ
ध्यायेस्मिन्नीश्वरस्यबाहुल्यात्परमेश्वरः॥अध्यात्मसंबधभूमाइहस्मिन्नितिदृढीकृतं॥३९॥शास्त्रदृष्ट्यातूपदे
शोवामदेववदस्तिच॥स्वात्मनोभेददृष्ट्यातुसोपदेशोनिरूपितः॥४०॥जीवमुख्यप्राणलिंगान्नेतिचेदितिसूत्र-
तः॥उपक्रांतार्थजालेहिसुदृढंप्रतिपादितं॥४१॥उपसंहारेक रूप्यंशास्त्रदृष्ट्यानसंशयः॥जीवमुख्यप्राणलिंगा
न्नेतिचेद्धारणंतदा॥४२॥इहाश्रितत्वात्तद्योगा त्रिविधोपासनाबलात्॥हृदब्जेवाद्वादशांतेभ्रूमध्येवाथवाशिरे॥ १२
॥४३॥ध्यायेन्मुक्त्यैसदादेवंत्रिविधोपासनंस्मृतं॥अहंसंज्ञाविनिर्दिष्टंहृदब्जमतिदुर्लभं॥४४॥तस्माद्धृदब्जेधार्यंच

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

ब्रह्मलिंगंपरात्परं ॥ प्राणादप्यधिकंलिंगंयस्माच्छ्रेयःपरंभवेत् ॥४५॥ तत्प्राणलिंगंमोक्षार्थीविदध्याद्धृदयांबुजे॥
सर्वत्रप्रसिद्धोपदेशात्॥ ॥ अस्मिन्यादेशिवस्यैवपरस्यामितितेजसः॥४६॥ सदासर्वैरुपास्यत्वेप्रधानत्वेनयुज्यते॥
अतएवऋषीणांचवाक्यानिप्रसरंतिहि॥४७॥ किंकारणंब्रह्मवाक्येष्ह्युपास्यत्वंसुनिश्चितं॥ किंकारणंकुतोजाता
जीवामःकेनवावयं॥४८॥ क्वचास्मेयेसंप्रतिष्ठावर्द्धिताःकेनवावयं॥ केनवर्तामहेशश्वत्सुखेष्वन्येषुवानिशं॥
॥४९॥ अविलंघ्याचविश्वस्यप्यवस्थाकेनवाकृता॥ कालस्वभावोनियतिर्यदृच्छावात्रविद्यते॥५०॥ भूतानियोनिः
पुरुषोयोगोवैषांपुरोथवा॥ अचेतनत्वात्कालादेश्चेतनत्वेनचात्मनाः॥५१॥ सुखदुःखाभिभूतत्वादनीशत्वाद्वि
चार्यते॥ तेध्यानयोगानुगताःप्रापस्यंच्छक्तिमैश्वरीं॥५२॥ पाशविच्छेदिकांसाक्षान्निगूढांस्वगुणैर्भृशं॥ तया
विच्छिन्नपाशास्ते सर्वकारणकारणं॥५३॥ शक्तिमंतंमहादेवमपश्यन्दिव्यचक्षुषा॥ यःकारणान्यशेषाणि
कालात्मसहितान्यपि॥५४॥ अप्रमेयोनयाशक्त्यानाकायेकोधितिष्ठति॥ निर्द्वंद्वंनिर्विकल्पंचतारकाकार
मीश्वरं॥५५॥ हृदयाकाशसंशोभिलिंगमत्यंतसुन्दरं॥ प्राधान्येनोपासनंचह्यस्मिन्नेवविचार्यते॥५६॥ यद्ब्र
ह्मगीयतेवेदैस्तद्ब्रह्मपरिकीर्त्यते॥ ब्रह्मोपासनमित्येववदंतिविबुधाअपि॥५७॥ लिंगोपासनमित्येवंवक्तुंत्वस्य
दुर्लाजनाः॥ ब्रह्माद्यास्सर्वगीर्वाणाऋषयश्चतपस्विनः॥५८॥ शिवलिंगंमुदादृष्ट्वाहृदयांबुजमध्यमे॥ वेदांतेषुच द
सर्वत्रशिवलिंगंनिगद्यते॥५९॥ केश्चित्स्वात्मानंदइतिप्रोच्यतेलिंगवैभवं॥ तथापिमानवामूर्खामुदान्यत्प्रत्यवीवदः

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि॰ नं॥२६०॥प्रत्यक्षमोस(लौ)भो हि सर्वेषां दुर्लभ स्मृतः॥वेदांतेषु च सर्वत्र प्रसिद्धाद्युपदेशतः॥६१॥तज्जत्वादिगुणो सा॰
१३ पेतः स्यादुपास्यः परात्परः॥अप्राणो ह्यमना वाक्यात्संबधो मनादिभिः॥६२॥सर्वं खल्विति वाक्येन जीव एव परो न
च॥लक्ष्ये बुद्धे स्थितिः साक्षादुपासनमिहोच्यते॥६३॥जीवमुख्येति सूत्रेण यत्पुरा प्रतिपादितं॥तद्ब्रह्मैव जगत्कर्तृ
मुमुक्षुः पश्यमाधरेत्॥६४॥तज्जत्वादपि तल्लत्वात्सर्वं ब्रह्मेत्युपासनं॥प्राणश्शरीरमस्येति सन्निधानार्थवाचिना
व्य ॥२६५॥इदं शब्देनेश्वरस्य परामर्श्यात्परो ध्रुवं॥अत्यासान्वीयमानोपि सर्वैरंगीकृतः श्रुतौ॥६६॥अर्थतोप्यसमर्थाना
मानेतयोप्यनादरः॥इदं पूर्वमिदं पश्चात्पदे वाक्ये भवेदिति॥६७॥नियमो नैव वेदोक्तिपदसांगत्यमर्थतः॥विविक्षि
सेम्य तगुणादीनामुपपत्त्याच केवले॥६८॥ब्रह्मोपास्यं परं नान्यदिति स्सुनिश्चितं॥इतश्चानुपपत्तेस्तु नाशरीरः कदाचन
॥६९॥सत्यकामस्सत्य इति गुणानां च शिवः परः॥कर्तृत्वेन च जीवस्य कर्मत्वेन परस्य च॥२७०॥उपदेशादेकमितप्रेत्ये
त्यस्मिन्नुपासनं॥शरीरपरयोर्भेदः स्मृतेरप्यवगम्यते॥७१॥मनोमयत्वादिधर्मविशिष्टस्यैव केवलं॥इतश्शब्दवि
शेषाच्च तयोर्भेदोवगम्यते॥७२॥उपास्यं तत्परं ब्रह्म न जीव इति निश्चितं॥परस्य यदुपास्यत्वमुक्तं नास्योपपद्यते॥
॥७३॥अर्भकौकस्त्वाद्धि धर्मव्यपदेशान्न चेश्वरः॥इति चेन्न निजायत्वादेवं सर्वगतः शिवः॥७४॥अणीयस्त्वं हृदाका
शापेक्षयाह्युपपद्यते॥यथा सर्वगताकाशः सूचीपाशाद्यपेक्षया॥२७५॥पर एव तथोपास्यो हृदयाकाशमध्यमे॥सं
भोगप्राप्तिरितिचेन्न वैशेष्याद्धृदं बुजे॥७६॥तस्यापहतपाप्मत्वात्सुखदुःखादयो न हि॥चराचरस्य ग्रहणादत्ताप १३

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

रङ्गोच्यते॥७७॥तस्मात्प्रकर्णाच्चापिसंग्राह्यःपरएवसः॥गुहांप्रविष्टावात्मानौबुद्धिजीवौहियद्यपि॥७८॥जीवात्म-
परमात्मानौनिश्चितौश्रुतिसूत्रयोः॥विशेषणाच्चतौग्राह्यावृतमित्यादिवाक्यतः॥७९॥तथांतरोपपत्तेश्चच्छायात्मा
नैवगृह्यते॥परमेश्वरएवाक्षिण्यंतरःपुरुषस्मृतः॥८०॥यएषोक्षीतिवाक्येनसंशयाद्वामइत्यतः॥अमृतत्वादयो
धर्मानजीवस्येतिनिश्चिताः॥८१॥स्थानादिव्यपदेशाच्चप्रसिद्धिस्थानतोविदुः॥सुखविशिष्टाभिधानादत्रोपास्यः
परःशिवः॥८२॥प्राणोब्रह्मकमित्यत्रकंखंशब्दौपराश्रयौ॥यच्छ्रुतोपनिषत्केतिसूत्रेणपरमेश्वरं॥८३॥संश्रुताश्चो
पनिषदोब्रह्मविद्याचयेनसः॥निषीदत्युपशीर्यंतेसंसारग्रंथयस्तथा॥८४॥तत्तद्भत्यभिधानाच्चग्रंथेष्पुपनिष
त्स्मृता॥यागतिर्देवयानाख्याप्रसिद्धासाहृदंबुजे॥८५॥अथोत्तरेणतपसाब्रह्मचर्येणवाक्यतः॥तयाप्रसिद्धया
ब्रह्मनिर्देशोनिश्चितःश्रुतौ॥८६॥अक्षिस्थःपुरुषोजीवइतितन्नोपपद्यते॥तत्रासवस्थितेब्रह्मसंभावान्नेत
रोविभोः॥८७॥चक्षुष्यंतरःपुरुषोब्रह्मैवेतिव्यवस्थितः॥अंतर्याम्यधिदैवादौतद्धर्मव्यपदेशतः॥८८॥नियंतृ
त्वादयोधर्माःसंभवंतिपरस्यहि॥अंतर्यामीपरस्तस्मात्सर्वशक्तित्वसंभवात्॥८९॥प्रधानमंतर्यामीतिय-
दुक्तंतन्नगृह्यते॥नचस्मार्तंप्रधानंतत्तत्तद्धर्माभिधानतः॥९०॥अदृष्टत्वादयोधर्माःप्रधानेसंभवंत्यपि॥
दृष्टत्वाद्यानप्रधानेचेतनेसंभवंतिच॥९१॥उभयेपिहिभेदेनपरमेनमधीयते॥नशारीरोन्तर्यामीतिका
ण्वामाध्यंदिनाविदुः॥९२॥अदृश्यत्वादिगुणकधर्मोक्तेःपरएवसः॥नजीवोवाप्रधानंवातद्धर्माणामभावतः॥

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि॰ ॥९३॥ परमेश्वरलिंगस्यसर्वज्ञत्वस्यशासनात् ॥ दिव्योह्यमूर्तःपुरुषःसबाह्याभ्यंतरोह्यजः ॥९४॥ अप्राणोह्यम सा॰
१४ नाःशुभ्रोह्यक्षरात्परतःपरः ॥ तद्विशेषणभेदाभ्यांव्यपदेशाच्चनेतरौ ॥९५॥ तथारूपोपन्यासाच्चद्रष्टृत्वादिगुणः
परः ॥ वैश्वानरःपरंब्रह्मतत्साधारणशब्दतः ॥९६॥ विशेषाच्चपरंब्रह्मजाठराग्न्यादिकंनहि ॥ स्मर्यमाणंचानु
मानंस्यादितःपरमेश्वरः ॥९७॥ वैश्वानरश्चनपरःशब्दादिभ्यस्तुजाठरः ॥ तथाह्यंतःप्रतिष्ठानादितिचेन्नतथा
परः ॥९८॥ तत्रदृष्ट्युपदेशाच्चसंभवात्पुरुषःपरः ॥ अधीयतेसएषोग्निरितिवाजसनेइनः ॥९९॥ उक्तेभ्यए
वहेतुभ्योनभूताग्निर्नदेवता ॥ वैश्वानरोत्तएवात्रपरएवेतिनिश्चितः ॥३००॥ साक्षादप्यविरोधंचजैमिनि
र्मन्यतेपरे ॥ अभिव्यक्तेराश्मरथ्यइतिप्राहपरंशिवे ॥१॥ अनुस्मृत्तेर्बादरिश्चसंपत्त्येरितिजैमिनिः ॥ तथाहिद
र्शयत्तेनंपरंवैश्वानरंशिवे ॥२॥ आमनंतितथाच्चार्याएवमस्मिन्पुरातने ॥ जाठराग्निविशिष्टंचवैश्वानरमुमा
पतिं ॥३॥ सर्ववेदांतवाक्येषुप्राये[illegible]णोपासनंपरं ॥ ब्रह्मोपासनमित्येवनिश्चितंश्रुतिसूत्रयोः ॥४॥ शिवलिंगा
द्दतेब्रह्मशब्दवाच्यंनहिश्रुतं ॥ द्युभ्वाद्यायतनंब्रह्मप्रधानंवेतिसंशयः ॥३०५॥ किंतावत्प्राप्तमधुनाप्रधानमि
तिकश्चन ॥ सेतुश्रुतेःपारवत्वादसारंब्रह्मणाभवत् ॥६॥ स्वशब्दा[illegible]परंब्रह्मसप्राधानादिकंभवेत् ॥ तस्यमु ध्यि
मृप्य क्तोप[illegible]लंद्युभ्वाद्यायतनस्यहि ॥७॥ तत्प्रधानस्यकेनापितद्धर्मोनैवनिश्चितः ॥ नानुमानमतच्छब्दाद्युभ्वा १४
द्यायतनंपरः ॥८॥ त[illegible]द्व्यपदेशाच्चद्युभ्वाद्यायतनंपरः ॥ तथाप्रकर्णाच्चापिद्युभ्वाद्यायतनंपरः ॥९॥ तथास्थि
दे॰भ

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

त्यदनाभ्यांचचुभ्वाद्यायतनंपरः॥तन्द्भूमासंप्रसादादद्युपदेशात्परोध्रुवं॥३१०॥भूमाधर्मोपपत्तेश्चसर्वज्ञत्वा त्ते
दिकःपरः॥अंबरांतधृतेर्ब्रह्मह्यक्षरंपरिगीयते॥११॥तस्याःप्रशासनाभावात्साचांबरधृतिर्नच॥तदन्यभाव
व्यावृत्तेरक्षरंब्रह्मकेवलं॥१२॥हृदंबुजेपरोध्येयोजन्मकर्मनिवृत्तये॥यत्तारकंपरंब्रह्मदहराकाशमध्यगं॥१३॥
तल्लिंगंबहिरन्विष्यलिंगमूर्तौनिवेश्यच॥तद्धिस्वांगाविनाभूतमुपास्यंसाधुमानसैः॥१४॥इदमेवहिवेदां
तेसर्वत्रप्रतिपादितं॥वेतद्ब्रह्मेत्यादिवाक्यैर्निश्चितं॥ब्रह्मधारणं॥३१५॥तद्धिष्यतेब्रह्मणोत्रव्यपदेशात्परःशि
वः॥नेतरस्यहृदाकाशेसमुपास्यत्वमिष्यते॥१६॥सर्वसूत्रेषुतद्ब्रह्मश्रुतिस्वारस्ययोगतः॥दहरकमलमध्येब्र
ह्मधार्ययदुक्तंसकलकलिनिवृत्त्येपाशविच्छित्तयेच॥विधिहरिमुखदेवास्सर्वदातत्स्वरूपाःपतिभजनसु
त्प्माःपारमुत्तीर्यमुक्ताः॥१८॥हृदंबुजेतिष्ठतियस्यलिंगंविचार्यमस्यास्तिनशास्त्रमन्यत्॥लिंगांगयोरैक्यमवा
प्यशुद्धंसाक्षाच्छिवोसौसकलैश्चवेद्यः॥१९॥अलंशंकरभक्तानामंशास्त्रावलोकनैः॥अगंतव्याग्रहारस्यपद- न्य
वीश्रवणेनकिं॥३२०॥अक्षरंप्रणवंब्रह्महृदयाब्जेविचार्यते॥किंध्येयंकिंसदापूज्यंप्रधानेजीवएववा॥२१॥इ
तिसंदिह्यसर्वत्रसिद्धांतेब्रह्मकेवलं॥उपास्यमितिनिर्णीतंपुनस्संदिह्यतेथयत्॥२२॥बुद्धिदार्ढ्यायतत्सर्वम
न्वेष्टव्यंमनीषिभिः॥दहरउत्तरेभ्यश्चेत्युपास्यःपरमेश्वरः॥२३॥तथाहिगतिशब्दाभ्यांलिंगंदृष्टंचयत्परे॥त
तोपिहृत्पुंडरीकेसमुपास्यःपरःशिवः॥२४॥उत्तरेभ्यश्चहेतुभ्योयच्छ्रुतिःप्रतिपाद्यते॥संध्यावंदनवन्नित्यंनि

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि० श्रितोवेदशास्त्रयोः॥२५॥धारणंदहराकाशेयावज्जीवंसुनिश्चितं॥उपलब्धेर्महिम्नोस्यधृतेरस्मिंस्तदिष्यते॥ सा०

१५ ॥२६॥प्रसिद्धेश्चहृदाकाशेब्रह्मधार्यंपरस्परं॥इतरस्यपरामर्शात्सएषइतिचेन्नहि॥२७॥असंभवात्परंब्रह्मधा

र्यंध्येयंहृदंबुजे॥आविर्भूतस्वरूपस्तुसोत्तराच्चेत्तथाह्यदि॥२८॥अन्यार्थश्चपरामर्शस्सएवहृदयांबुजे॥अल्पश्रु

तेरितियदितदुक्तंश्रुतिसूत्रयोः॥२९॥अनुकृतेस्तस्यचात्राप्यपिचस्मर्यतेश्रुतौ॥श्रुतिसूत्रन्यायभंग्यानिश्चि

तेलिंगधारणे॥३०॥धृतेर्वाचनिकोयोर्थस्सूत्रेषुप्रतिपादितः॥वाच्यलिंगंहृदाकाशेनित्यंतद्धारणंहियत्॥३१॥

एभिःसूत्रैस्सदाब्रह्मधर्तव्यंहृदयांबुजे॥तदेवहिपरंस्थानेनिर्णीतंश्रुतिसूत्रयोः॥३२॥तच्छब्दात्प्रमितंब्रह्मदहरे

दिव्यमद्भुतं॥पूज्यंध्येयंधार्यमेवजन्मकर्मनिवृत्तये॥३३॥यन्मनुष्याद्यधिकारत्वाच्छास्त्रस्यहृदपेक्षया॥त-

त्तुद्धेयंसदालिंगंब्रह्मविष्ण्वादिपूजितं॥३४॥यथामनुष्यैर्धर्तव्यंलिंगंदेवैस्तथैवहि॥अधिकारंदेवतानांमनुते॰

बादरायणः॥३५॥तदुपर्यपिदेवानांविष्ण्वादीनांचसंभवात्॥तेषांविग्रहवत्वाच्चह्यधिकारोत्रनिश्चितः॥

॥३६॥नानेकप्रतिपत्तेर्हिविरोधःकर्मणीतिचेत्॥दर्शनाद्देवतानांचह्यधिकारस्सुनिश्चितः॥३७॥विरोधोदु-

ष्यापरिहराःशब्दस्यप्रचुरस्यच॥इतिचेन्नात्रप्रभवाच्छ्रुत्यास्मृत्याचनैवतत्॥३८॥अतएवचनित्यत्ववे

दतद्धर्मयोर्ध्रुवं॥समाननामरूपत्वादुत्तरासृष्टिरेकच॥३९॥आवृत्तावीश्वराणामप्यविरोधोत्रनिश्चितः॥द १५

र्शनाच्चस्मृतेश्चैवह्यविरोधोत्रनिश्चितः॥४०॥एतत्सूत्रेषुदेवानांमनुष्याणांचनिश्चितः॥इतःपरंतुशूद्राणा

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

मधिकारोस्तिवानवा ॥४१॥ इतिसंदिह्यतेतेषांजैमिनिर्मन्यतेमुनिः ॥ असंभवान्नाधिकारंमध्वादिषुतथाभव
त् ॥४२॥ तत्रज्योतिषिभावाच्चदेवानांनाधिकारिता ॥ अचेतनेमंडलेहिचेतनेनसुनिश्चिते ॥४३॥ बादरायण-
आचार्योमन्यतेदेवतादिषु ॥ अधिकारंतथैवेतिशूद्रादीनांनचाभवेत् ॥४४॥ संस्कारैस्संस्कृतायेचतेसर्वेप्यधि
कारिणः ॥ तदनादरपाठाच्चसूच्यते तेषुनारदः ॥४५॥ क्षत्रियत्वगतेश्चापिलिंगाच्चैत्ररथेनहि ॥ उत्तरत्रनेषांतुसं ते
स्कारैर्वर्जनेयथा ॥४६॥ क्षत्रियाणांचशूद्राणांत्रैवर्णिकनिरूपणं ॥ तदभावाभिलाषाच्चसंस्कारस्याभिमर्शनात् ॥
॥४७॥ प्रवृत्तेस्तदभावस्यधारणेचतथेतिचेत् ॥ श्रवणाध्ययनार्थस्यप्रतिषेधात्स्मृतेरपि ॥४८॥ शूद्रादीनांनाधि-
कारइतिसम्यक्सुनिश्चितः ॥ कंपनाच्चपरंब्रह्मज्योतिर्ब्रह्मैवदर्शनात् ॥४९॥ आकाशोर्थांतरत्वादिव्यपदेशात्पर-
स्मृतः ॥ सुषुप्त्युत्क्रांत्योर्भेदेनपरएवाभिधीयते ॥३५०॥ अतःपत्यादिशब्देभ्योब्रह्मलिंगंसानातनं ॥ हृदंबुजेसदाध्या
येसदापूज्यंमुमुक्षुभिः ॥५१॥ शुद्धस्फटिकसंकाशंदेवंनिष्कलमव्ययं ॥ कारणंसर्वलोकानांसर्वलोकमयंपरं ॥५२॥
अंतर्बहिस्थितेलिंगमणोरल्पंमहत्परं ॥ भक्तानामप्रयत्नेनदृश्यमीश्वरमव्ययं ॥५३॥ ब्रह्मेंद्ररुद्रविष्ण्वाद्यैरपि
देवैरगोचरं ॥ वेदसारंचविद्वद्भिरगोचरमितिश्रुतं ॥५४॥ आदिमध्यांतरहितंभेषजंभवरोगिणां ॥ शिवतत्वमि-
तिख्यातंशिवार्थंजगतिस्थितं ॥३५५॥ अव्यक्तंलिंगमाख्यातंसर्वतत्वैककारणं ॥ अनाद्यनंतविश्वस्ययदुपादा-
नकारणं ॥५६॥ तदेवमूलप्रकृतिर्धार्मिकीगगनात्मिका ॥ ततएवसमुत्पन्नंजगदेतच्चराचरं ॥५७॥ अशुद्धंशुद्धव-

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि० च्छुद्धंशुद्धाशुद्धंचयत्त्रिधा॥ततःशिवोमहेशश्चरुद्रोविष्णुःपितामहः॥५८॥भूतानिचेंद्रियैर्जातालीयंतेनच- सा०
१६ शिवाज्ञया॥अतएवशिवोलिंगीलिंगमाज्ञापयेद्यतः॥५९॥यत्रतेनतदाज्ञातंकार्यायप्रभवेत्स्वतः॥ततोजातस्य
विश्वस्यतत्रैवविलयोमतः॥३६०॥अनेनलिंगतातस्यभवेन्नान्यनकेनचित्॥लिंगंचशिवयोर्देहंताभ्यांयस्मा
दधिष्ठितं॥६१॥अतस्तत्रशिवःसांबोनित्यमेवसमर्च्यते॥लिंगंवेदिर्महादेवीलिंगीसाक्षान्महेश्वरः॥६२॥तयो
स्संपूजनादेवस्सचसाचसमर्चितौ॥नतयोर्लिंगदेहत्वंविद्यतेपरमार्थतः॥६३॥वोमित्यकाक्षरंब्रह्मब्रह्मणःप्रतिपा
दकं॥तदप्यविदितंतावद्ब्रह्मणाविष्णुनातदा॥६४॥रजसातमसाचित्तंतयोर्यस्मात्तिरस्कृतं॥तदाविभक्तमभव
च्चतुर्थैकंयदाक्षरं॥६५॥अउमेतिचमात्राभिःपरस्ताच्चार्द्धमात्रया॥तत्राकाराश्रितेभागेपरलिंगस्यदक्षिणे
॥६६॥उकारश्चोत्तरेतस्यमकारस्तस्यमध्यतः॥अर्द्धमात्रात्मतोनादःश्रूयतेलिंगमूर्धनि॥६७॥विभक्तेपितथात
स्मिन्प्रणवेपरमाक्षरे॥विभागार्थंततोदेवौनकिंचिदपिजग्मतुः॥६८॥वेदात्मनातथाव्यक्तःप्रणवोविकृतिंगतः॥
तत्राकारोऋगभवदुकारोयजुरव्ययः॥६९॥मकारस्सामसंजातोनादस्त्वाथर्वणीश्रुतिः॥ऋगपस्थापयामासस
मासात्स्वार्थमात्मनः॥३७०॥रजोगुणेषुब्रह्माणंमूर्तिष्वाद्यंक्रियास्वपि॥सृष्टिंलोकेषुपृथिवींतत्वेष्वात्मानमव्य
ये॥७१॥कलाध्वनिनिवृत्तिंचवेद्यंब्रह्मसुपंचसु॥लिंगभागेष्वधोभागंबीजाख्यंकारणत्रये॥७२॥चतुषष्टिगु- १६
णेश्वर्यंबोद्धंयदणिमादिषु॥तदिच्छमर्त्यैर्दशभिर्व्याप्तंविश्वमृचाजगत्॥७३॥अथोपस्थापयामासस्वार्थेदश-

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

विधंयजुः॥सत्वेगुणेषुविष्णुंचमूर्तिःष्वाद्यंक्रियास्वपि॥७४॥स्थितिं लोकेष्वंतरिक्षंविद्यातत्वेषुचत्रिषु॥
कलाध्वनिप्रतिष्ठांचवामंब्रह्मसुपंचसु॥३७५॥मध्यंचलिंगभागेषुयोनिंचत्रिषुहेतुषु॥प्राक्तंत्वचतथैश्वर्यं
तस्माद्धिश्वंयजुर्मयं॥७६॥अथोपस्थापयामाससामार्थंदशधात्मनः॥तमोगुणेष्वथोरुद्रंमूर्तिःष्वाद्यं या क्रि
स्वपि॥७७॥संहृतिंतुत्रिलोकेषुतत्वेषुशिवमुत्तमे॥विद्याकलामघोरंचघोरंब्रह्मसुपंचसु॥७८॥लिंगभागेषु
पीठोर्ध्वबीजनेकारणंत्रये॥पौरुषंचतथैश्वर्यमित्थंसाम्नातंजगत्॥७९॥अथाथर्वाहनैर्गुण्यमर्थंप्रथम·
मात्मनः॥ततोमहेश्वरंसाक्षान्मूर्तिष्वपिसदाशिवं॥३८०॥क्रियासुनिष्क्रियास्यापिशिवस्यपरमात्मनः॥मूर्ता
नुग्रहणंचैवमुच्यंतेयेनजंतवः॥८१॥लोकेष्वपियतोवाचानिवृत्तंमनसासह॥तदूर्ध्वमुन्मनालोकात्सोमलो
स८ कमलौकिकं॥८२॥सोमस्सहोमयातत्रनित्यंनिवर्ततीश्वरः॥तदूर्ध्वमुन्मनालोकाद्यंप्राप्यननिवर्त्तते॥८३॥शां·
तिंचशांत्यतीतांचव्यापिकांवैकलास्वपि॥तत्पुरुषंचतथेशानंतत्रब्रह्मसुपंचसु॥८४॥मूर्धानमपिलिंगस्यभा
गंभागेष्वनुत्तरं॥तत्रलिंगेसमाराध्यःकेवलोनिष्कलःपरः॥३८५॥तत्वेष्वपितथाबिंदुस्ततःशक्तिस्ततःपरं॥
तत्वादपिपरंतत्वमतत्वंपरमार्थतः॥८६॥कारणेषुत्रयातीतान्मायाविक्षोभकारणात्॥अनंताशुद्धविद्यायाः
परस्ताच्चमहेश्वरः॥८७॥सर्वविद्येश्वराधीशात्तत्पराच्चसदाशिवात्॥सर्वमंत्रतनोर्देवाच्छक्तित्रयसमन्विता
त्॥८८॥पंचवक्त्राद्दशभुजात्र्यक्षात्सकलनिष्कलात्॥तस्मादपितथाबिंदोरर्थेंदोश्चततःपरात्॥८९॥ततःपरा

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि० च्छिवाधीशान्तदाख्याच्चततःपरात्॥ततःपरात्सुषुम्ने शाद्ब्रह्मरंध्रेश्वरादपि॥३९०॥ततःपरस्याश्शक्तेश्चपरस्ता० सा०
१७ च्छिवतत्वतः॥परमंकारणंसाक्षात्स्वयंनिष्कारणंशिवं॥९१॥करणानांचधातारंध्यातारंध्येयमव्ययं॥हृदयाका
शमध्यस्थंपरमात्मोपरिस्थितं॥९२॥सर्वैश्वर्येणसंपूर्णंसर्वेश्वरम नीश्वरं॥ऐश्वर्यंचापिमायेयादशुद्धान्मानु
षादिकात्॥९३॥अपराच्चपराच्चाद्याद्धि विशुद्धाध्वगोचरात्॥तत्पराच्छुद्धविद्याद्यात्समनंतात्परात्परात्॥९४
परमंपरमैश्वर्यमुन्मनोर्ध्वमनादिच॥अपरादपराधीनंनिरस्तातिशयंस्थिरं॥९५॥ई मर्थेदशविधेरिग्यमा- ४
थर्वणीश्रुतिः॥यस्माद्गरीयसीतस्माद्विश्वंव्याप्तमथर्वणात्॥९६॥ऋग्वेदःपुनराहेदंजगद्रूपंमयोच्यते॥येनाहमा-
त्मतत्वस्यनित्यमस्यभिधायकः॥९७॥यजुर्वेदोवदत्तद्वत्स्वप्नावस्थामयोच्यते॥भोग्यात्मनापरिणताविद्यावेद्याय
तोमहं॥९८॥सामचाहसुषुप्त्याख्यंसर्वंसर्वमयोच्यते॥ममार्थेनशिवेनेदंतामसेनाभिभूयते॥९९॥अथर्वाहतुरी
याख्यंतुरीयातिकमेवच॥मयाभिभूयतेतस्मादध्वातीतःपरोस्म्यहं॥४००॥अध्वात्मकंत्रितीयंतुशिवविद्यात्मसं-
हितं॥तत्त्रैगुण्यंत्रईसाध्यंशोध्यंपतिपदेषिणां॥१॥अध्वातीतंतुरीयाख्यंनिर्वाणंपरमंपदं॥तदतीतंतुनैर्गुण्या-
दध्वनोस्यविशोधकं॥२॥द्वयोःप्रमापकोनादोनादांतश्चमदात्मकः॥तस्मान्ममार्थस्वातंत्र्यात्प्रधानःपरमेश्वरः॥३॥
यदस्तिवस्तुतत्सर्वंगुणप्रधान्ययोगतः॥समस्तंव्यस्तमपिचप्रणवार्थंप्रचक्षते॥४॥सदर्थवाचकंतस्माल्लिंगमेव १७
तदक्षरं॥तेनोमितिजगत्कृत्स्नंकुरुतेप्रथमंशिवः॥५॥शिवोवाप्रणवोह्येषप्रणवोवाशिवस्मृतः॥वाच्यवाचकयो-

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

भेदोनात्यंतंविद्यतेयतः ॥६॥ चिंतयारहितोरुद्रोवाच्योयंमनसासह ॥ अप्राप्यतन्निवर्त्तंतेवाचस्त्वेकाक्षरेण
सः ॥७॥ एकाक्षरादकाराख्यादाज्ञाब्रह्माभिधीयते ॥ एकाक्षरादुकाराख्याद्विद्याविष्णुरुदीर्यते ॥८॥ एकाक्ष-
रान्मकाराख्याच्छिवोरुद्र उदाहृतः ॥ दक्षिणांगान्महेशस्यजातोब्रह्मात्मसंज्ञकः ॥९॥ वामांगादभवद्विष्णुस्ततो
विद्येतिसंज्ञकः ॥ हृदयादभिरुद्रोभूच्छिवस्यशिवसंज्ञकः ॥१०॥ सृष्टेःप्रवर्त्तकोब्रह्मास्थितेर्विष्णुर्विमोहकः ॥
संहारस्यतथारुद्रस्तयोर्नित्यंनियामकः ॥११॥ तस्मात्त्रयस्तेकथ्यंतेजगतःकारणत्रयं ॥ कारणत्रयहेतुश्चशि
वःपरमकारणं ॥१२॥ अर्थमेनमविज्ञायरजसाबद्धवैरयोः ॥ तयोर्मध्येमहालिंगंस्वयंतत्रसमुत्थितं ॥ एवमो
मोतिप्राहुर्यदिहोक्तंचमथर्वणं ॥ ऋचोयजूंषिसामानिशाखाश्चान्याःसहस्रशः ॥१४॥ वेदेष्वेवंस्वयंवक्रैर्व्यक्तम स
र्थंवदत्स्वपि ॥ स्वप्नानुभूतमिवतत्ताभ्यामध्यवसीयते ॥१५॥ तत्वप्रकाशकंलिंगंस्वयंतत्त्वंसमुत्थितं ॥ ततोलिं
गस्यलिंगत्वेलिंगिनोपिचलिंगिता ॥१६॥ ततोविश्वस्यजगतोविशेषात्स्वात्मनोपिच ॥ उत्पत्तिविलयैश्चैवया
थार्थ्यंचषडध्वनां ॥१७॥ निरुत्तरंतरंब्रह्मनिष्कलंलिंगमैश्वरं ॥ पशुपाशमयस्यास्यप्रपंचस्यसदापतिं ॥१८॥
अकुतोभयमत्यंतमवृद्धिक्षयमव्ययं ॥ बाह्यमभ्यंतरंप्राप्यब्रह्माभ्यंतरवर्जितं ॥१९॥ निरस्तातिशयैश्वर्यद्विश्व-
लोकविलक्षणं ॥ अलक्षणमनिर्देश्यमवाङ्मनसगोचरं ॥२०॥ प्रकाशैकरसंशांतंप्रसन्नंसततोदितं ॥ सर्वक
ल्याणनिलयंशक्त्याताद्दक्षयान्वितं ॥२१॥ एवंलिंगस्यमहिमावेदांतेषुप्रकाशितः ॥ तज्ज्ञात्वाहृदयेधार्यसामरः

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि० स्यविधानतः ॥२२॥ योधत्ते लिंगमव्यक्तं सएवपरमेश्वरः ॥ इतिश्रुतेषुबहुषुतद्धारणमुदाहृतं ॥२३॥ प्रतिज्ञायचजि- सा०
१८ ज्ञासालक्षणेब्रह्मणःकृते ॥ तल्लक्षणंप्रधानेपिगतमित्यनुशंकिते ॥२४॥ अशब्दत्वेनतत्पूर्वंनिराकृतमिदंपुनः ॥
अशक्त्याशब्दवत्वेहिनिराकर्तुंप्रवर्तते ॥४२५॥ आनुमानिकमित्यादिसूत्रंतस्यार्थनिर्णयः ॥ अनुमानेननिर्णीतंसां
ख्यादिभिरिहोदितं ॥२६॥ अव्यक्तंहिप्रधानंतदित्यकेषांश्रुतौपुनः ॥ सांख्यप्रसिद्धमेवात्रपठ्यतेमहदित्यपि ॥२७
इतिचेन्नशरीरस्यग्रहणात्तत्पदेनहि ॥ रथरूपकविन्यस्तमव्यक्तेनैवगृह्यते ॥२८॥ शरीरमेवाव्यक्तंहिनप्रधाना-
दिकंभवेत् ॥ तत्सूक्ष्मंतुतदर्हत्वात्स्थूलंयद्यपिनाभवत् ॥२९॥ तथापिसूक्ष्मंतदितिनिर्णीतंश्रुतिसूत्रयोः ॥ अर्थव
त्तदधीनत्वात्परत्वंतस्यगृह्यते ॥३०॥ ज्ञेयत्वावचनाच्चैवनप्रधानमिवाभवेत् ॥ वदतीतिश्रुतिरपिप्रधानस्येति
चेन्नहि ॥३१॥ तथाप्रकरणात्प्राज्ञोनप्रधानंतथाभवेत् ॥ अग्निजीवेश्वराणांचत्रयाणांप्रश्नइत्यपि ॥३२॥ एवमेव-
ह्युपन्यासोमहद्वच्चतथैवच ॥ नसंख्याभिमतंकिन्तुशरीरमितिनिश्चितं ॥३३॥ अविशेषाच्चपवनमप्राधान्यमि
होच्यते ॥ उपक्रमात्तुयज्ज्योतिस्तुशब्दोह्यवधारणे ॥३४॥ तेजोबन्नप्रकृतिरप्यजाशब्देनगृह्यते ॥ तथाह्येकेधी-
यतेत्रप्रकृतिःशक्तिरेवच ॥३५॥ तत्कल्पनोपदेशाच्चमध्वादिवदिहोच्यते ॥ अविरोधोह्यजाशब्दात्प्रकृतिःशक्ति
रिष्यते ॥३६॥ नानाभवातिरेकाच्चतन्नसंख्योपसंग्रहात् ॥ तस्मान्नसांख्यवादस्यश्रुतिमात्रमिहेष्यते ॥३७॥ प्राण १८
दयोवाक्यशेषात्संख्यापूर्णमिष्यते ॥ तथाहिज्योतिषैकेषाममसत्यंनेतिसूत्रतः ॥३८॥ प्राणादिनेवतत्रापिसंख्या-

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

संपत्तिसंभवात् ॥ यथाकाशादिषु पुनः कारणत्वेन चाभवत् ॥ ३९ ॥ तत्रैव व्यपदिष्टोक्तेरात्मैव परिगृह्यते ॥ समाक
र्षाच्च ब्रह्मैव वेदितव्यं न चेतरत् ॥ ४० ॥ तस्माज्जगद्वाचित्वं च वाचित्वाद्ब्रह्म केवलं ॥ तदुक्तं जीवमुख्येति सूत्रेण पि-
हृदं स्मृते ॥ ४१ ॥ तथा प्रश्नव्याख्यानाभ्यामन्यार्थं जैमिनिर्मुनिः ॥ मन्यतेस्मिन्प्रकरणे प्राणप्रग्रहणं तथा ॥ ४२ ॥ वा- २
क्यन्वयात्परं ब्रह्म यल्लिंगं हृदयांबुजे ॥ उपास्यं तत्परं ब्रह्म वेदितव्यं मनीषिभिः ॥ ४३ ॥ लिंगप्रतिज्ञासिद्धेश्च हृदब्जे-
धार्यमव्ययं ॥ अश्मरथ्यो मुनिस्तत्र मन्यते पुनरादरात् ॥ ४४ ॥ एवं भवादौडुलोमिरित्येवह्युत्क्रमिष्यते ॥ अव ॥
स्थितेः काशकृत्स्न इति तद्ब्रह्मजीवयोः ॥ ४५ ॥ न भेदोपि न चाभेदस्सामरस्यात्तयोर्ध्रुवम् ॥ भेदभेदाभ्युपगमाद्विसु
लिंगाग्निवत्तदा ॥ ४६ ॥ जीवो ह्युपासकस्साक्षादुपास्यं ब्रह्म केवलं ॥ लिंगांगसामरस्येन भेदाभेदौ व्यवस्थितौ ॥ ४७ ॥
उपादानं हि प्रकृतिर्निमित्तं ब्रह्म केवलं ॥ दृष्टांतानुपरोधाच्च मृदादिवदिहेष्यते ॥ ४८ ॥ तथाभिध्योपदेशाच्च प्रकृति-
त्वं विचार्यते ॥ प्रकृतित्वं च कर्तृत्वं ब्रह्मणो वाक्यगौरवात् ॥ ४९ ॥ साक्षादप्युभयाम्नानात्प्रकृतिः कर्तृ च श्रुतं ॥ यो
निश्च हीति सूत्रेण ब्रह्मणो निश्चितं पुनः ॥ ५० ॥ कर्तृत्वं प्रकृतित्वं च योनिशब्देन तत्तथा ॥ परिणामादात्मकृतेरात्म
नेस्वयमित्यतः ॥ ५१ ॥ प्रकृतित्वं च कर्तृत्वं सिद्धं तस्मात्परस्य हि ॥ एतेन सर्वे व्याख्याता व्याख्याता इति सूत्रतः ॥ ५२ ॥
एतैश्च हेतुभिस्सर्वे वेदांता ब्रह्मतत्पराः ॥ तद्ब्रह्म हृदये धार्यं प्रतिसूत्रं व्यवस्थितं ॥ ५३ ॥ एतदैश्वर्यविभवं लिंगं ब्रह्म-
हृदंबुजे ॥ सामरस्यविधानेन धार्यं पूज्यं मुमुक्षुभिः ॥ ५४ ॥ तस्मात्सर्वप्रयत्नेन सर्वकर्माणि मानवः ॥ परित्यज्य यथा

CC-0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि॰ कालेकरपीठेतुपूजयेत् ॥५५॥ यतःपापार्णवात्त्रातुंभक्तिर्नौरिवनिर्मिता ॥ तस्माद्भक्त्युपपन्नस्यरजसातमसाच सा॰
१९ किं ॥५६॥ अंत्यजोवाधमोवापिमूर्खोवापतितोपिवा ॥ शिवभावंप्रपन्नश्चेत्पूज्यस्सर्वसुरासुरैः ॥५७॥ तस्मात्सर्वप्र
यत्नेनहृदयेधारयेच्छिवं ॥ अभक्तानांक्वचिदपिफलंनास्तियतस्ततः ॥५८॥ वेदैःशास्त्रैर्वेदविद्भिर्विचार्यार्थसुनि
श्चितं ॥ ब्रह्मघ्नोवासुरापानोस्तेयीवागुरुतल्पकः ॥५९॥ मातृहापितृहावापिवीरहाभ्रूणहापिवा ॥ संपूज्यामंत्रकं
भक्त्याशिवलिंगंपरात्परं ॥६०॥ तैस्तैःपापैःप्रमुच्येतसामरस्यमनायदि ॥ तस्मात्सर्वप्रयत्नेनपतितोपियजेच्छि
वं ॥६१॥ भक्तश्चेन्नापरःकश्चिद्भिक्षाहारोजितेंद्रियः ॥ कृत्वापिसुमहत्पापंभक्त्यापंचाक्षरेणतु ॥६२॥ पूजयेद्यदि
तल्लिंगंतस्मात्पापात्प्रमुच्यते ॥ अभक्षावायुभक्षाश्चयेचान्येव्रतकर्शिताः ॥६३॥ तेषामेतैर्नतैर्नास्तिशिवलोकस
मागमः ॥ भक्त्यापंचाक्षरेणैवयोलिंगंसकृदर्चयेत् ॥६४॥ सोपिगच्छेच्छिवस्थानंशिवलिंगस्यधारणात् ॥ तस्मा
त्तपांसियज्ञाश्चसर्वेसर्वस्वदक्षिणाः ॥६५॥ शिवलिंगार्चनस्यैतेकोट्यंशेनापिनोसमाः ॥६५॥ अरुद्रोवासरुद्रोवाशि
वलिंगंसमर्चयेत् ॥ यःसकृत्पतितोवापिमूढोवामुच्यतेनरः ॥६६॥ षडक्षरेणवानित्यंतथापंचाक्षरेणवा ॥ एंकाले क
द्विकालंवात्रिकालंसर्वदाथवा ॥६७॥ येर्चयंतिमहादेवंविज्ञेयास्तेगणेश्वराः ॥ जातेनात्मद्रुहायेननार्पितंलिंगमैश्वरं
॥६८॥ सचिरंसंचरत्यस्मिन्संसारेदुःखसागरे ॥ दुर्लभंप्राप्यमानुष्यंतल्लिंगंयोनधारयेत् ॥६९॥ निष्फलंतस्यत १९
ज्जन्ममोक्षायनभवेद्यतः ॥ हृत्प्रदेशेसदाधार्यंशिवलिंगंमनीषिभिः ॥७०॥ दुर्लभंप्राप्यमानुष्यंयोलिंगंहृदिधारयेत्

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

तस्यैवसफलंजन्मकृतार्थस्सनरोत्तमः॥७१॥लिंगागसंभवाय्येचशिवलिंगैकतत्पराः॥शिवलिंगार्चनपरानतेदुःखस्य
भागिनः॥७२॥येवांछंतिमहाभोगान्राज्यंचत्रिदशालयं॥येर्चयंतिसदाकालंहृदिस्थंलिंगमद्भुतं॥७३॥सौभाग्यं-
कीर्तिमद्रूपंसत्यंत्यागःप्रभावता॥शौर्यंचजगतिख्यातिर्लिंगमर्चयतोभवेत्॥७४॥तस्मात्सर्वंपरित्यज्यशिवैका
हितमानसः॥सामरस्यविधिंकुर्याद्यदिच्छेच्छिवमात्मनः॥७५॥संग्रहेणप्रमाणानिपुराणेष्वागमेषुच॥अन्विष्य
लिखितान्येतान्येतस्मिन्विषयेपुनः॥७६॥पौनरुक्त्यमनादृत्यबुद्धिदार्ढ्यायसादरं॥वैदिकत्वंदर्शयतासूत्रतात्पर्य
वर्णनं॥७७॥कर्त्तव्यंवचनैरन्यैःकिंसाध्यमितिचेच्छृणु॥वक्ष्यामिसंग्रहेणैवव्याससूत्रैकरूपतां॥७८॥वीरशैवाग-
माख्यातपदार्थानांपरस्परं॥आगमेषुपदार्थायेतएवव्याससूत्रके॥७९॥शब्दभेदेनवक्ष्यंतेसंज्ञाभंग्यंतरेणच॥
शास्त्रयोनित्वसूत्रेणशास्त्राणांयोनिताश्रुता॥८०॥जिव्हाग्रेगुरुलिंगंस्याज्जगुरागमिकाइति॥उपदेष्टाशिवस्साक्षा
द्विद्यानांजगतोयतः॥८१॥ज्योतिश्चरणसूत्रेणयएषोक्षिणिपूरुषः॥परंब्रह्मेतिकथितस्तमेवागमिकाजगुः॥८२॥
द्रुगग्रेशिवलिंगंस्यादितिलिंगस्वरूपतां॥अतएवप्राणइतिप्राणानांब्रह्मताश्रुता॥८३॥आगमेषुसमाख्यातंप्राण-
लिंगंतथांतरे॥दहराख्येधिकरणेयद्ब्रह्मसमुदीरितं॥८४॥तदेवागमशास्त्रेषुमहालिंगंहृदीरितं॥आनंदाख्येधि
करणेयच्चब्रह्मसमीरितं॥८५॥भावलिंगंतदेवाहुरागमार्थविशारदाः॥भावार्पणादिभेदेनयदुक्तंत्रिविधार्पणं॥८६॥
चेतोर्पणाधिकरणेसएवार्थोविचार्यते॥छंदोविशेषपरतामाशंक्याथविचारितं॥८७॥धीप्रेरकत्वादित्यादिसर्वेभा

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि० ष्वेषुपार्तिके ॥ स्थानादिव्यपदेशाच्च सूत्रेयोर्थस्स एव हि ॥ ८८ ॥ स्थलशब्देनागमेषु सर्वत्र समुदीर्यते ॥ प्रतिसू- सा०
२० त्रेचैवमेव वक्तुं शक्या सरूपता ॥ ८९ ॥ ग्रंथविस्तरभीत्याहं प्रकृतार्थमुपक्रमे ॥ भेदाभेद इति प्रोक्तस्तत्रैवमवधा-
र्यतां ॥ ९० ॥ केश्चित्तु सूत्रितोध्यासः शास्त्रस्यादौ समर्थितः ॥ आदिसूत्रे सूचितव्यो विषयोन प्रयोजनं ॥ ९१ ॥ जीव
ब्रह्मस्वरूपैक्यलक्षणो विषयश्चयः ॥ तत्तज्ज्ञानं चाध्यासतंत्रमिति सूत्रार्थ एव चेत् ॥ ९२ ॥ जीवब्रह्मस्वरूपैक्यमेवभा
वेन तस्य च ॥ विषयत्वेन युज्येत तत्त्वदृष्ट्यावधार्यतां ॥ ९३ ॥ जीवब्रह्मस्वरूपैक्यं न क्वचित्सूत्रितं पुनः ॥ अंशो नाने
ति सूत्रे तु जीवस्य ब्रह्मणोंशता ॥ ९४ ॥ भिन्नाभिन्नत्वमग्नेस्तु विष्फुलिंगवदीरितं ॥ नैह्यग्नेर्विष्फुलिंगस्य स्वरूपैक्यं
प्रदर्श्यते ॥ ९५ ॥ जीवस्य ब्रह्मणो येन स्वरूपैक्यं पुनर्भवेत् ॥ न भेदाभेदयोर्युक्तमेकस्मिन्नेव वर्तनं ॥ ९६ ॥ परस्परवि-
रोधादित्यतो वाच्यं विचक्षणैः ॥ अविद्यालक्षणोपाधिकृतमित्यभिधीयते ॥ ९७ ॥ उभयव्यपदेशादित्यहिकुंडलव
त्तथा ॥ प्रकाशाश्रयवत्वाच्च तेजस्त्वात्पूर्ववत्तथा ॥ ९८ ॥ अनुज्ञापरिहारौ च देहसंमधतस्तथा ॥ ज्योतिरादिवदि
त्येवं तत्संभाव्याप्तितस्तथा ॥ ९९ ॥ उपपत्तेः प्रदीपवदावेशस्तदनंतरं ॥ तथा हि दर्शयातीति च भेदाभेदयोः पुनः ॥
॥ ५०० ॥ प्रमाणतोपि सिद्धत्वाद्दृष्टांतेषु च दर्शनात् ॥ विजानीयात्तदन्योन्यमविरोधव्यवस्थितिं ॥ १ ॥ तथा च वक्ष्यते
नैश्च तथा भोक्त्रादिसूत्रके ॥ अविरोधं संप्रदर्श्य व्याख्यातं सूत्रमप्यथ ॥ २ ॥ ब्रह्मकारणवादश्च यद्विवेदन्यथा पुनः ॥
सम्यक्तर्कबलेनैव क्षिप्यते यद्यपि श्रुतिः ॥ ३ ॥ प्रमाणं स्वस्य विषये स्वयं भवितुमर्हति ॥ ४ ॥ तथापि स्वस्य विषये प्र २०

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

माणांतरतोहृते॥स्वयमन्यपरैवस्यात्कृष्णलश्रवणेयथा॥४॥यथामंत्रार्थवादोचतर्कोपिस्वस्यगोचरात्॥अ
प्रतिष्ठितयेवस्यादन्यत्रैवंकिलस्थितिः॥५॥धर्माधर्मस्थलेदृष्टात्तर्कदुर्बलतापुनः॥प्रामाणांतरसिद्धार्थबोधि
तेयच्छ्रुतेःपुनः॥६॥अयुक्तंतदिदंविद्याद्यद्येवंसंमतंतव॥प्रमाणांतरसिद्धोर्थःश्रुत्याकोवात्रबोध्यते॥भोक्तृ
भोज्यविभागोहिप्रसिद्धोजगतिह्ययं॥शारीरश्चेतनोभोक्ताभोग्याःशब्दादयस्त्विमे॥८॥यथाभोक्तादेवदत्तोभो
ग्यास्तेचोदनादयः॥भोक्तृभोग्यविभागस्याभावःसर्वस्थलेभवेत्॥९॥यदिभोक्ताभोग्यभावंभोग्यंभोक्तृत्वमेव
वा॥तयोरन्योन्यतापत्तिर्ब्रह्मणःपरकारणात्॥१०॥अनन्यत्वात्प्रसज्येतनयुक्तंयदिबाधनं॥प्रसिद्धस्यविभा
गस्यनयुक्तमतएवहि॥११॥ब्रह्मकारणतायाश्चनिश्चयोनेतियोवदेत्॥स्याल्लोकवदितिब्रूयात्तंमूर्खंपुरुषंप्रति॥
॥१२॥उपपद्यतएवेदमस्मत्पक्षेविभाजनं॥एवंलोकेचदृष्टत्वात्समुद्रादुदकात्मनः॥१३॥अनन्यत्वेपिवीच्यादेर्वि
भागउपपद्यते॥ नचोद कात्मनोवार्धेरनन्यत्वेपिवैपुनः॥१४॥फेनादीनामनेके षामितरेतरतामता॥न च
वीचीतरंगादेरन्योन्यत्वेत्वसंभवे॥१५॥उदात्मनस्सरिद्भर्तुरनन्यत्वंनसिद्ध्यति॥इहाप्येवंभोक्तृभोग्यविभागोपि
समर्थितः॥१६॥सदात्मकाद्ब्रह्मणोवाप्यनन्यत्वंनसिद्ध्यति॥नन्वेतदविरोधस्यवाङ्मात्रेसमर्थने॥१७॥तदनन्य
त्वमारंभणशब्दादिभ्यसूत्रके॥वाचारंभणमित्यादिश्रुत्यासर्वस्यसर्वथा॥१८॥नचभेदप्रपंचस्यबाधितत्वसम
र्थनात्॥नचानेनहिसूत्रेणश्रुत्यावाचादिरूपया॥१९॥कृत्स्नस्यापिप्रपंचस्यबाधितत्वंसमर्थ्यते॥२०॥नप्रत्यक्षप्र

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि० माणेनशुद्धोभेदप्रपंचकः॥शक्यतेबाधितुंश्रुत्या किंतुन्याय्यइतीर्यते॥२१॥श्रुतेरेवान्यपरताप्रत्यक्षादिविरोध- सा०
२१ तः॥यथाहिपूर्वतंत्रेचकृष्णलेश्रपयेद्विधेः॥२२॥प्रत्यक्षेणस्वर्णमाषेविकृतौबाधितेसति॥उष्णीकरणमात्रार्थप
रतालक्षणाकृता॥२३॥यत्सोमेनयजेतेतिविधौयागेनभावयेत्॥इत्यर्थस्वीकृतौसोमेनयागेनेतिचैतयोः॥२४॥
सामानाधिकरण्येनह्यन्वयेसोमयागयोः॥प्रत्यक्षभेदबाधेनभेदोलक्षणयायथा॥२५॥अपिचाद्यापिकृत्स्नस्य
प्रपंचस्यचबाधनं॥तर्हिश्रुतिस्वरूपस्यपदार्थस्मरणस्यच॥२६॥तथावाक्यार्थज्ञानस्यप्रपंचांतर्गतत्वतः॥बा
धेतेषामपिसतिप्रपंचोबाध्यतांकथं॥२७॥कथंमज्जनौ[illegible]वेध्याममजिह्वानचेतिच॥नचप्रपंचबाधेपितिष्ठत्येव नी
स्वरूपकं॥२८॥तस्मात्कार्यैचोपपन्नमितिवक्तुंहिशक्यते॥प्रतियोग्यनिषेधेसत्यभावोवादमात्रतः॥२९॥नचश्रु-
त्याप्रपंचस्यस्वरूपेनहिबाध्यते॥येनवास्याद्धिव्याघातःसत्यत्वेतस्यकिंत्विति॥५३०॥स्वरूपबाधाभावेचबाध्य
तारूपसत्यता॥प्रपंचेभ्युपगंतव्यानस्यात्सत्यत्वबाधनं॥३१॥तस्यांनानेनसूत्रेणश्रुबाधःसमर्थ्यते॥किंत्वभि सा
न्नत्वमेवेतिनभेदाभेदयोःपुनः॥३२॥विरोधइतिमंतव्यंतथान्यत्रप्रदर्श्यते॥इतरव्यपदेशाच्चस्वहिताकरणादि-
तः॥३३॥दोषप्रसक्तिरित्यादौतथातत्त्वमसीतिच॥जीवस्यब्रह्मणःसम्यगभेदव्यपदेशतः॥३४॥किंजीवकर्तृकासृ
ष्टिःकिंवाब्रह्मैककर्तृका॥सृजेज्जीवःस्वस्यहितंनाहितंनरकादिकं॥३५॥इत्याद्याशंक्याधिकंतुभेदनिर्देशसूत्रतः॥ २१
कर्ताजीवोनकिंत्वत्रकर्तृब्रह्मैवचाधिकं॥३६॥तज्जीवस्याहितमपिसृज्यतेवेत्युदीर्यते॥कथंवाभेदकथनेहीनता

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

धिकतेउभे॥३७॥कथंसर्वेश्वरःसाक्षात्सर्वज्ञत्वेनसर्वतः॥जीवान्स्वात्मतयापश्यन्तेषुशोकादिकंस्पृजेत्॥३८॥स्वनि
ष्ठत्वेनशोकादेरनुभूतिप्रसंजनात्॥इत्याशंक्याश्मादिवच्चतदसंगतिरीरिता॥३९॥अनेनचाश्मनोसूर्यकांतवै
डूर्यभेदिनो॥पाषाणत्वेनसामान्यमनाभेदेसमाहिते॥४०॥व्यक्तिभेदाद्धीनरूपमध्यमोत्तमभेदतः॥स्वरू
पाणांचवैचित्र्यंकार्यवैचित्र्यमेवच॥४१॥एवंचजीवपरयोरपिव्यक्तिभिदाकृता॥हीनताधिकताकार्यवैचित्र्यंचो
पपद्यते॥नपाषाणत्वसामान्यंविभिन्नंव्यक्तयःपुनः॥भिन्नायेवेतिनैकत्रभेदाभेदावुभाविति॥४३॥पाषाणत्वादिसा
मान्यावच्छिन्नप्रतियोगिकः॥योभेदस्तदभावस्वरूपाभेदस्यचाप्ययं॥४४॥वैडूर्यत्वाद्यवच्छिन्नप्रतियोगीवचे-
त्तया॥भिदाव्यक्तिषुतस्याश्चाभयंस्यप्रतिपादनात्॥४५॥नचैवंशंकितुंशक्यंवज्रवैडूर्ययोर्द्वयोः॥सामानाधिक-
रण्यादिव्यवहारप्रसंजनं॥४६॥इष्टत्वात्तस्यसामान्याभेदोल्लेखनमत्रच॥विशेषाभेदविरहादतएवेश्वरेपिच॥४७॥
आत्मत्वेनैवजीवाद्भेददृष्टिःसूत्रितापुनः॥आत्मेतितूपगच्छंतिग्राहयंतिचसूत्रके॥४८॥अतएवपरेश्चापिव्यक्तिस्था
नीयमत्रच॥विहायाहंकृतेरंशंसामान्यस्थानिनंपुनः॥४९॥चैतन्यस्यैवचाभेदोह्यादरेणसमर्थितः॥विशिष्टेचस्व
रूपेवाभेदाभावोपलक्षितं॥५०॥सामानाधिकरण्योक्तेर्विषयस्त्वितियद्यपि॥सर्वात्मनायत्रभेदग्राहिनास्तिप्रमाण
कं॥५१॥विषयस्तत्स्वरूपैक्यंसोयंदेवादिकेस्थले॥भेदग्राहिप्रमाणंस्याद्यत्रकार्येचकारणे॥५२॥प्रथक्तत्वावभेदे
कभेदाभावोपलक्षितं॥स्वरूपद्वयमेवंवाभेदसामान्यएवयः॥५३॥तदाभावोपलक्षितस्वरूपद्वयमेववा॥विषयः

CC-0- Jangamwadi Math Collection. Digitized by eGangotri

श्रि० प्रकृतेश्चोत्तमादेशमितिश्रुतौ॥५४॥एकंविजानतस्सर्वविज्ञानोक्त्या तदंतरं॥सर्वात्मत्वंप्रतिज्ञायश्रुतौतदुपपा- सा०
२२ दके॥५५॥ऐतदात्म्यमिदंसर्वंनवकृत्वोपदेशतः॥सामानाधिकरण्यस्यव्यपदेशोयथापुनः॥५६॥ब्रह्मस्वरूपयोर्नस्व
रूपैक्यविषयस्तथा॥तत्वमस्यादिवाक्योक्तव्यपदेशोपिदृश्यते॥५७॥भेदाभेदापदेशस्यतुल्यत्वादुभयत्रच॥नान्यो
तोस्तितथायत्रनान्यत्पश्यतिचाप्यथ॥५८॥यस्मात्परंनापरंचेतिविहितस्यश्रुतौपुनः॥दृश्यभेदनिषेधस्यचेतनाचे
तनत्वतः॥५९॥संसार्यसंसारित्वाभ्यांविरुद्धाभ्यांपरस्परं॥विरुद्धधर्मवत्तस्यचोभयत्रापितुल्यता॥६०॥ततोभेदनि
षेधाच्चभेदस्यप्रतिपादनात्॥भेदाभेदौसिध्यतस्तोनविरोधस्तदेतयोः॥६१॥अविलक्षणोपाधिकृतामिथ्याभिधा द्या
इति॥यदुक्तंतदविद्यायामिथ्यायाश्चैवकुत्रचित्॥६२॥अविद्योपाधिकायाश्चेत्ययुक्तंप्रतिभातितत्॥नचानुमानिक
मितिसूक्ष्मंतुतदितिस्थले॥६३॥अविद्यासूत्रितैवेतिवाच्यंतत्रपरात्परं॥महतोव्यक्तमित्यत्रप्रधानंत्रिगुणंपुनः॥६४॥
गृह्यतेव्यक्तशब्देनेत्येवंशंकासमुद्भवे॥शरीररूपविन्यस्तगृहीतेरित्यनेनतु॥६५॥आत्मानंरथिनंविद्धिशरीरंरथमेव
च॥इतिमंत्रेरथत्वेनरूपितंदेहमेवहि॥६६॥गृह्यतेनप्रधानमित्युक्त्वाचसमनंतरं॥व्यक्तत्वात्तुशरीरस्यकथमव्यक्तता
भवेत्॥६७॥इत्याशंक्याथसूक्ष्मंतुतदर्हत्वादिनापुनः॥सूक्ष्मंशरीरमेवात्रव्यक्तशब्देनगृह्यते॥६८॥स्थूलेशरीरेनेः
त्युक्तंनाविद्यात्रिगुणापुनः॥अव्यक्तशब्दग्राह्यस्यात्सूक्ष्मदेहस्यसंभवे॥६९॥अप्रसिद्धाचयाविद्यानग्राह्यावैयतश्च २२
सा॥अविद्यायाउपादानतयाशब्देप्रकारतः॥७०॥ब्रह्मांडव्यापितायास्तुचाहमग्नइतिस्वतः॥सर्वप्रत्यक्षतायाश्चा-

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

प्यंगिकारेणवैपुनः॥७१॥सूक्ष्मत्वाव्यक्तशब्दार्हत्वयोःपुनरसंभवात्॥अन्यथापूर्वसूत्रेतुगृह्यतेव्यक्तशब्दतः॥७२॥
गृह्यतेदेहमित्युक्त्वाततउत्तरसूत्रके॥अविद्यागृह्यतेत्येवमानेव्याहतिसंभवात्॥७३॥प्रधानवादापत्तेश्चशंकितव्यं
नचाप्यथ॥अर्थवत्तदधीनत्वादित्यनेनप्रधानकं॥७४॥स्वतंत्रमीश्वराधीनवैलक्षण्यमुदीरितं॥इतिसेश्वरसांख्या
नांयोगानांचमतेपुनः॥७५॥प्रधानस्येश्वराधीनतांगीकारेणतावता॥वैलक्षण्यं नचासिद्धेरुक्तारीतिर्नसंगता॥७६॥
यथेंद्रियप्रवृत्तीनामर्थाधीनतयापुनः॥इन्द्रियेभ्यःपरत्वंस्यादर्थानांचैवमेवहि॥७७॥आत्मप्रवृत्तेर्देहस्याद्धीनत्वा
द्धर्मणःपुनः॥परत्वमात्मनश्चैवमर्थकंसूत्रमत्रहि॥७८॥किंचाविद्यासूत्रिताचेदुत्तराधिकरणेतत्॥अनारब्धव्यमे
वस्यादजामंत्रेतुतद्गृहे॥७९॥संभाविते प्रधानस्यगृहे णेच विशेषतः॥कारणाभावतःपूर्वपक्षानुत्थानतःपुनः॥८०॥
देवात्मशक्तिंस्वगुणैर्निगूढामुत्तरत्रच॥मायांतुप्रकृतिंविद्यान्माइनन्तुमहेश्वरं॥८१॥इत्यादिनेश्वराधीनत्वस्यैवप्र
कृतेःपुनः॥परामर्शस्यन्याय्यत्वात्तथाज्योतिरुपक्रमात्॥८२॥तथांह्यधीयतेएकेमध्वादिवदितिह्यथ॥तत्कर्मनोपदे
शाच्चेत्येवंहिस्यादसंगतं॥८३॥अनादिभूताविद्यायास्सम्यग्ग्रहणसंभवे॥मुख्यत्वात्प्रकृतित्वाच्चतत्परित्यागतस्त
तः॥८४॥अजाशब्देनप्रकृतिंतांतेजोबन्नलक्षणां॥गृहीत्वाजनिमत्वेनाव्यजत्वाभावतःपुनः॥८५॥अजाशब्दासंग
तिरित्याशंक्यमधुनोयथा॥आदित्यस्यासावदित्योदेवमध्विति मंत्रतः॥८६॥मधुत्वकल्पनंचैवम् निजायाश्चकेव
ले॥तेजोबन्नादिप्रकृतेरजावदियमित्यजा॥८७॥अजत्वकल्पनमितिक्वचनस्याप्यसंगतेः॥ तस्मात्तेजोबन्नरूप

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि० प्रकृतिव्यतिरेकतः ॥८८॥ अनादिभूताविद्यानिसृष्टिताभिमतानच ॥ अस्तिप्रमाणभावेननचाविद्यांविनापुनः ॥ सा०
२३ ॥८९॥ ब्रह्मणोवयवाभावात्परिणामोपपादनं ॥ कृत्स्नप्रसक्तिसूत्रस्यव्याख्यानावसरेमया ॥९०॥ अशंक्यपरिहारो-
पिविस्तरेणप्रदर्श्यते ॥ भेदाभेदाविमौसिद्धांतस्मादित्युपरम्यते ॥९१॥ ॥ इतिश्रीद्विशिष्टाद्वैतसिद्धांतरहस्येको
त्तरशतस्थलाभिज्ञनीलकंठकृते निगमागसारसंग्रहे क्रियासारे प्रथमोपदेशः समाप्तमस्तु ॥ ॥ श्रीरस्तु ॥ ॥ ॐ ॥

॥ श्रीगणेशायनमः ॥ ॥ तत्रादिमोपदेशेस्मिन्सर्वज्ञेसर्वशक्तिके ॥ उपादानेप्रपंचस्यनिमित्तेब्रह्मणिक्रमात् ॥१॥ सर्व
वेदांतवाक्यानांदर्शितस्तुसमन्वयः ॥ स्मृत्यादिभिर्विरोधेनबाधाभावोद्वितीयके ॥२॥ उपदेशेयुक्तिभिस्तुबहुभिः सं
प्रदर्श्यते ॥ तत्रवेदांतवाक्यानिजगतांब्रह्मकारणं ॥३॥ उपादानमितिप्राहुःप्रधानमितिसांख्यकाः ॥ ततोविरोधा
द्वक्तव्योबाधस्त्वन्यतरस्यहि ॥४॥ तत्रश्रुतेरनुष्ठेयधर्मादौसावकाशतः ॥ स्मृतेरनवकाशत्वाद्बाधोयुक्तस्तवाश्रुतेः
॥५॥ आर्षप्रत्यक्षतःपश्यत्प्रधानेदृश्यकारणं ॥ प्रणिनायस्मृतिंचर्षिस्ततःप्रत्यक्षमूलता ॥६॥ स्मृतेस्तदश्वबाधस्तु
युक्तएवतयाश्रुतेः ॥ नैवंस्मृत्याश्रुतेर्बाधोन्यस्मृत्यनवकाशतः ॥७॥ दोषप्रसंगान्नानास्मृत्यनुरोधेनचेत्पुनः ॥ नाना २३
कारतयावक्तुंशक्यंनैवेतिवेपुनः ॥८॥ वस्तुनिस्वेच्छयानानाविकल्पानुपपत्तितः ॥ अतःशैवीयधर्माणांप्रमाणेस्तुश्रु

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

तीतरैः ॥९॥ निषेधेचक्कचिद्दृष्टेचामृतस्यादिवाक्यतः ॥ तेषांबाधनमेवस्यान्नैवतैःश्रुतिबाधनं ॥१०॥ ननुशैवीयध
र्माणांप्रामाण्यंगीकृतेसति ॥ पूर्वकांडप्रसिद्धानांमग्निष्टोमादिकर्मणां ॥११॥ वीरशैवीयधर्माणांपरस्परविरोधतः ॥
अग्निष्टोमादिमंत्राणामेवतदुपयोगिनां ॥१२॥ सर्वेषांवेदभागानांवीरशैवीयकर्मणि ॥ केषांचिदुपयुक्तानाममृत
स्यादिरूपिणां ॥१३॥ परस्परंविरोधेनबहुवेदानुसारतः ॥ वीरशैवोपयुक्तानांमंत्राणामेववैपुनः ॥१४॥ अर्थांतरपर-
त्वेतुवक्तव्यमितिचेच्छृणु ॥ पूर्वकांडोक्तधर्माणामनुष्ठानविधौततः ॥१५॥ सर्वमन्यत्परित्यज्यत्यादौश्रुतिभिरन्यथा ॥
उपात्तत्वाद्द्वयोर्विकथमत्रोपपद्यते ॥१६॥ कर्मकांडोक्तकर्मभ्योवाच्यंप्राबल्यमेवहि ॥ ब्रह्मकांडस्यकाचाश्मरत्न-
योरिवयत्तयोः ॥१७॥ अंगांगित्वस्यचोक्तत्वात्ज्ञानप्राबल्यवादतः ॥ नकर्मणानप्रजयाधनेनेत्यादिवाक्यतः ॥१८॥ ज्ञा
नैकनाश्यतापाशस्येत्येवंचव्यवस्थिते ॥ नकर्मकांडवैयर्थ्यात्तद्दृष्टांतपुरस्सरं ॥१९॥ श्रुतिमात्रस्यवैयर्थ्यानुमितौ
वेदमूलता ॥ नवक्तव्येतिप्रक्रांतक्रमभंगस्समापतेत् ॥२०॥ नक्वचिद्वेदभागस्यवेदमात्रप्रमाणतो ॥ किंतुवच्मकर्मकां
डात्ज्ञानकांडस्यमुख्यतो ॥२१॥ तत्रापिवीरशैवानांतत्रदृष्टांतउच्यते ॥ रत्नापणेनिविष्टानांविविधानांक्रमेणहि ॥२२॥
काचमुक्तामरकतप्रभृतीनांयथापुनः ॥ क्रेयाधिकारानुगुणाद्दर्शयेत्तदतिक्रयं ॥२३॥ गृहीतारःस्वसामर्थ्यानुगुण्यैने
वकेवलं ॥ गृह्णंतिनैवचान्यस्यदूषणायैवकल्पते ॥२४॥ एवंसामान्यतोवेदप्रामाण्येसतितत्पुनः ॥ स्वाधिकारानुसा
रेणवैदिकेषुप्रवर्तते ॥२५॥ क्रमसोपानमार्गेषुत्रयाणामथवाद्वयोः ॥ अतिक्रमेणचारूढेसोपानोत्पाटनेनहि ॥२६॥

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि० कुर्वन्तितद्वदेवात्रसर्वेषांचप्रमाणता ॥ नहिंशैवःक्वचिद्वापिसर्वकर्माणियत्नतः ॥२७॥ अनुतिष्ठेत्प्रमाणंचदित्येवं सा०
२४ नावलप्यतां ॥ राजा धनीवालोकेषुसत्सुरत्नेषुभूरिशः ॥२८॥ अल्पकंयंमणिंधत्तेतावतातन्नदुष्यते ॥ एवंप्रमाणं
वेदाश्चेत्यास्तांकिंविस्तरेणतु ॥२९॥ अत्रसैद्धांतिकोयंमेसरणिर्दर्शइष्यते ॥ सर्ववेदांतवाक्यानां सर्वज्ञेसर्वशक्ति
के ॥३०॥ लिंगेजगदुपादानेनिमित्येपरमेश्वरे ॥ अद्योपदेशेकथितंवाच्यवाचकयोर्बलात् ॥३१॥ समन्वयोदर्श
तेत्रलिंगांगैक्यस्यदर्शनात् ॥ तस्यस्मृतिविरोधेनसावकाशत्वदोषतः ॥३२॥ तद्बाधपरिहारायद्वितीयोध्याय
इष्यते ॥ परंजगदुपादानमितिवेदावदंतिहि ॥३३॥ स्मृतिःप्रधानंवदतीत्येतदन्यतरत्तदा ॥ बाधितव्यंविरोधे-
नतयोःकस्येतिसंशयः ॥३४॥ तत्रानुष्ठेयधर्मादौसावकाशश्रुतिःस्मृता ॥ स्मृतिर्निरवकाशास्यत्तत्रैवप्रतिपा-
दिका ॥३५॥ तस्मात्स्मृत्याश्रुतेर्बाधोयुक्तइत्यब्रवीन्मुनिः ॥ आर्षप्रत्यक्षयोगेनजगत्कारणमेवतत् ॥३६॥ इतिनि
श्चित्यतदनुस्मृतिमाशुचकारसः ॥ ततःप्रत्यक्षमूलत्वात्स्मृतेःप्राबल्यमत्रहि ॥३७॥ इतिचेन्नप्रधानस्यकारणत्वंन
युज्यते ॥ नानास्मृत्यनुरोधेननानाहेतुत्वकल्पनात् ॥३८॥ विकल्पानुपपत्तेश्चवस्तुनिश्रुतदोषतः ॥ महर्षित्वावि
शेषाच्चपरस्परविरोधतः ॥३९॥ पौरुषेयतयातासामप्रामाण्यंचनश्रुतेः ॥ प्रत्यक्षमानमूलत्वेप्रधानोक्तेस्तदोच्यते
॥४०॥ इतरेषांचानुपलब्धेरित्येवानुशासनात् ॥ आर्षदर्शनसंपन्नैःकणादप्रमुखैःकिमु ॥४१॥ तन्नोपलभ्यतेरत- २४
स्मात्प्रधानांशेस्मृतेर्नहि ॥ शिवलिंगस्यभावस्यविश्वमेतच्चराचरं ॥४२॥ तदेतन्नविजानंतिपशवःपाशगौरवात् ॥

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

तमेकमेवबहुधावदंतिब्रह्मशाश्वतं ॥४३॥ अजानंतःपरंभावमविकल्पंमहर्षयः॥ अपरब्रह्मरूपेचपरंब्रह्मात्मकेत
था ॥४४॥ केचिदाहुर्महादेवमनादिनिधनंप्रभुं ॥ भूतेंद्रियांतःकरणप्रधानविषयात्मकं ॥४५॥ अपरंब्रह्मनिर्दिष्टंप-
रब्रह्मचिदात्मकं ॥ ब्रह्मत्वाद्बृंहणत्वाच्चब्रह्मणीतेपरापरे ॥४६॥ अनेनब्रह्मरूपेणब्रह्मणोधिपतेःप्रभोः॥ विद्याविद्याअ
स्वरूपीतिकैश्चिदीशोनिगद्यते ॥४७॥ विद्येतिचेतनांप्राहुस्तथाविद्यामचेतनां ॥ विद्याविद्यात्मकंचैतद्विश्वंविश्वगुरो
र्विभोः॥४८॥ रूपमेवनसंदेहोविश्वंतस्यवशेयतः॥ भ्रांतिर्विद्यापरंचेतिशार्वंरूपंपरेविदुः॥४९॥ अयथाबुद्धिरर्थे
षुबहुधाभ्रांतिरुच्यते ॥ यथात्मकारसंपत्तिर्विद्येतिपरिकीर्त्यते ॥५०॥ विकल्परहितंतत्त्वंपरमित्यभिधीयते ॥ तत्रेदं
शांकरंरूपंतदाज्ञाधिष्ठितंयतः॥५१॥ सदसद्रूपइत्याहुस्सदसत्पत्तिरित्यपि॥ सत्येसाधौचसच्छब्दःसद्भिरेवप्रयु-
ज्यते॥५२॥ विपरीतेत्वसच्छब्दःकथ्यतेवेदवादिभिः॥ सच्चासच्चजगद्विश्वंशरीरंपरमेष्ठिनः॥५३॥ यदिदंसदितिप्रो
क्तंयच्चासदितिकथ्यते ॥ तयोःपतित्वात्तुशिवःसदसत्पतिरुच्यते ॥५४॥ क्षराक्षरात्मकंप्राहुःक्षराक्षरपदंपरे॥ क्षर
स्सर्वाणिभूतानिकूटस्थोक्षरउच्यते ॥५५॥ उभेतेपरमेशस्यरूपंतस्यवशेयतः॥ तयोःशिवःपरश्शांतःक्षराक्षरपरस्स्मृ
तः॥५६॥ समष्टिव्यष्टिरूपंचसमष्टिव्यष्टिकारणं ॥ वदंतिमुनयःकेचिच्छिवंपरमकारणं॥५७॥ समष्टिंविदुरव्यक्तंव्य
ष्टिंव्यक्तंतथैवच ॥ तेरूपेपरमेशस्यतदिच्छामनुवर्तनात् ॥५८॥ तयोःकारणभावेनशिवलिंगेपरात्परं ॥ कारणार्थवि
दःप्राहुःसमष्टिव्यष्टिकारणं ॥५९॥ जातिव्यक्तिस्वरूपीतिकथ्यतेकैश्चिदीश्वरः॥ यत्पिंडेष्वनुवर्तेतसाजातिरितिकथ्य

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

ते ॥६०॥ व्यक्तव्यावृत्तरूपं तत्पिंडं जातेः समाश्रयः ॥ व्यक्तयो जातयश्चैव तदाज्ञापरिपालिताः ॥६१॥ यतस्ततो म+

हादेवो जातिव्यक्तिवपुः स्मृतः ॥ प्रधानपुरुषव्यक्तकालात्मा कथ्यते शिवः ॥६२॥ प्रधानं प्रकृतिं प्राहुः क्षेत्रज्ञं पुरुषं-
तथा ॥ त्रयोविंशतितत्वानि व्यक्तमाहुर्मनीषिणः ॥६३॥ कालकार्यप्रपंचस्य परिणामेककारणं ॥ एषामीशः शिवो
धाता प्रवर्त्तकनिवर्तकः ॥६४॥ प्रादुर्भावतिरोभावहेतुरेकः स्वराडजः ॥ तस्मात्प्रधानपुरुषव्यक्तकालः स्वरूपवा
न् ॥६५॥ हेतुर्नोधिपतेस्तेषां धाता भोक्ता महेश्वरः ॥ विराड्ढिरण्यगर्भात्मा केश्चिदीशो निगद्यते ॥६६॥ हिरण्यगर्भो
लोकानां हेतुर्विश्वेश्वरो विराट् ॥ अंतर्यामी परश्चेति कथ्यते कविभिः शिवः ॥६७॥ प्राज्ञतैजसविश्वात्मेत्यपरे संप्रच
क्षते ॥ माता मानं च मेयं च मतिमाहुस्तथापरे ॥६८॥ कर्ता क्रिया च कार्यं च करणं कारणं परे ॥ जाग्रत्स्वप्नसुषुप्त्यात्मेत्य
परे संप्रचक्षते ॥६९॥ तुरीयमपरे प्राहुस्तुरीयातीतमित्यपि ॥ केचित्संसारिणं प्राहुस्तमसंसारिणं परे ॥७०॥ स्वतंत्रम
परे प्राहुरस्वतंत्रं परे विदुः ॥ घोरमित्यपरे प्राहुस्साम्यमित्यपरे विदुः ॥७१॥ तमाहुर्विगुणं केचिद्गुणवंतं परे विदुः ॥ सं
रागवंतं परे प्राहुर्वीतरागं तथापरे ॥७२॥ निष्क्रियं तं परे प्राहुस्सक्रियं तं परे जनाः ॥ निरिंद्रियं परे प्राहुस्सेंद्रियं च तथा
परे ॥७३॥ ध्रुवमित्यपरे प्राहुस्तमध्रुवमथापरे ॥ अरूपं केचिदाहुर्वै रूपवंतं परे विदुः ॥७४॥ दृश्यमित्यपरे प्राहुस्तम-
दृश्यमितीतरे ॥ वाच्यमित्यपरे प्राहुस्तमवाच्यमितीतरे ॥७५॥ शब्दात्मकं परे प्राहुः शब्दातीतमथापरे ॥ केचिच्चिंता
मयं प्राहुश्चिंतयारहितं परे ॥७६॥ ज्ञानात्मकं परे प्राहुर्विज्ञानमिति चापरे ॥ केचित्ज्ञेयमिति प्राहुरज्ञेयमिति केच-

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

न॥७७॥केचिदेकंतमेवाहुरनेकमितिचापरे॥एवंविकल्प्यमानेषुयाथार्थ्येपरमेशितुः॥७८॥नाध्यवस्यंतिमुन-
योनानाप्रत्ययकारणात्॥येपुनस्सर्वभावेनप्रपन्नाःपरमेश्वरं॥७९॥तेविजानंत्ययत्नेनशिवंपरमकारणं॥याव २
त्पश्योनैषपश्यत्यनीशंकविंपुराणंभुवनस्येशितारं॥तावद्दुःखेवर्त्ततेबद्धपाशःसंसारेस्मिन्चक्रनेमिक्रमेण
॥८०॥यदापश्यःपश्यतिरुक्मवर्णंकर्तारमीशंपुरुषंब्रह्मयोनिं॥तदाविद्वान्पुण्यपापेविधूयनिरंजनःपरममुपै
तिसाम्यं॥८१॥नशिवस्याणवोबंधःकार्मोमायेयएवच॥प्राकृतोवाथबौद्धोवाप्यहंकारात्मकस्तथा॥८२॥नैवा
स्यमानसोबंद्धोनचैत्तोनेंद्रियात्मकः॥नचतन्मात्रबंधोस्यभूतबंधोनकश्चन॥८३॥नचकालःकलाचैवनविद्या-
नियतिस्तथा॥नरागोनचविद्वेषःशंभोरमिततेजसः॥८४॥नचाप्यभिनिवेशोस्यकुशलाकुशलान्यपि॥कर्मा-
णितद्विपाकाश्चसुखदुःखेनतत्फले॥८५॥आशयानास्यसंमधस्संसारैःकर्मणामपि॥भोगैश्चभोगसंस्कारैःका
लत्रितयगोचरैः॥८६॥नतस्यकारणंकर्त्तानादिरंतस्तथांतरं॥नकर्मकरणंवापिनाकार्यंकार्यमेवच॥८७॥नास्यबं
धुरबंधुर्वानियंताप्रेरकोपिवा॥नपतिर्नगुरुस्त्रातानाधिकोनसमस्तथा॥८८॥नजन्ममरणेतस्यनाकांक्षितमका
क्षितं॥नविधिर्ननिषेधश्चनमुक्तिर्नचबंधनं॥८९॥नास्तियद्यदकल्याणंतत्तदस्यकदाचन॥कल्याणंसकलंचा
स्तिपरमात्माशिवोयतः॥९०॥सशिवःसर्वमेवेदमधिष्ठायस्वशक्तिभिः॥अप्रच्युतस्वतोभावास्थितःस्थाणुरतः
स्मृतः॥९१॥शिवेनाधिष्ठितेयस्माज्जगदेतच्चराचरं॥सर्वरूपस्थितःशर्वस्तथाज्ञात्वानमुह्यति॥९२॥सर्वोरुद्रोनमस्त

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

स्मे पुरुषस्स परो महान्॥ हिरण्यबाहुर्भगवान् हिरण्यपतिरीश्वरः॥९३॥ अंबिकापतिरीशानः पिनाकी वृषवाहनः॥ए॰
को रुद्रः परंब्रह्म पुरुषः कृष्णपिंगलः॥९४॥ वालाग्रमात्रो हृन्मध्ये ध्येयो यं दहरांतरे॥ हिरण्यकेशः पद्माक्षो ह्यरुणस्ता
म्र एव च॥९५॥ यो वसर्पत्यसौ देवो नीलग्रीवो हिरण्मयः॥ सौम्यो घोरस्तथा मिश्रश्चाक्षरश्चामृतो व्ययः॥९६॥ स पुंविशे
षः परमो भगवानंतकांतकः॥ चेतनाचेतनान्मुक्तः प्रपंचाच्च परात्परः॥९७॥ लोके सातिशयत्वेन ज्ञानैश्वर्ये विलोकि
ते॥ शिवेनातिशयत्वेन स्थितिं प्राहुर्मनीषिणः॥९८॥ प्रतिसर्गं प्रसूतानां ब्रह्मणां शास्त्रविस्तरं॥ उपदेष्टा स एवादौ॰
कालावच्छेदवर्तिनां॥९९॥ कालावच्छेदयुक्तानां गुरूणामप्यसौ गुरुः॥ सर्वेषामेव सर्वेशः कालावच्छेदवर्जितः॥९९॥ शु
द्धा स्वभावकी तस्य शक्तिः सर्वातिशायिनी॥ ज्ञानमप्रतिघं नित्यं वपुरत्यंतनिर्मले॥१००॥ ऐश्वर्यमप्रतिद्वंद्वं सुखमा
त्यंतिकं बलं॥ तेजः प्रभावो वीर्यं च क्षमा कारुण्यमेव च॥१॥ परिपूर्णस्य सर्गाद्यैर्नात्मनोस्ति प्रयोजनं॥ परानुग्रह एवा
स्य फलं सर्गस्य कर्मणः॥२॥ प्रणवो वाचकस्तस्य शिवस्य परमात्मनः॥ शिवरुद्रादिशब्दानां प्रणवोत्ति परस्मृतः॥३॥
शंभोः प्रणववाच्यस्य भावनात्तज्जपादपि॥ या सिद्धिः सा परा प्राप्या भवत्येव न संशयः॥४॥ तस्मादेकाक्षरं लिंगमा
हुरागमपारगाः॥ वाच्यवाचकयोरैक्यं मन्यमाना यशस्विनः॥५॥ अस्य मात्राः समाख्याताश्चतस्रो वेदमूर्धनि॥ आ
कारश्चाप्युकारश्च मकारो नाद एव च॥६॥ अकारं बह्वृचं प्राहुरुकारो यजुरुच्यते॥ मकारस्साम नादस्तु श्रुतिराथर्वणी २६
श्रुता॥७॥ अकारस्तु महद्बीजं रजस्स्रष्टा चतुर्मुखः॥ उकारः प्रकृतिर्योनिस्सत्त्वं पालयता हरिः॥८॥ मकारः पुरुषो बीजी

CC-0- Jangamwadi Math Collection. Digitized by eGangotri

तमःसंहारकोहरः ॥ नादःपरःपुमानीशोनिर्गुणोनिष्क्रियःशिवः ॥ ९ ॥ एवंतिसृभिरेताभिर्मात्राभिर्निखिलंत्रिधा ॥ अ
भिधायशिवात्मानंबोधयत्यर्द्धमात्रया ॥ १० ॥ यस्मात्परंनापरमस्तिकिंचिद्यस्मान्नाणीयोनज्यायोस्तिकश्चित् ॥ वृक्ष
इवस्तब्धोदिवितिष्ठत्यकस्तेनेदंपूर्णंपुरुषेणसर्वं ॥ ११ ॥ शक्तिस्वाभाविकीतस्यवेद्याविश्वविलक्षणा ॥ एकानेकस्वरू
पेणभातिभानोरिवप्रभा ॥ १२ ॥ अनंताशक्तयस्तस्यचेच्छाज्ञानक्रियादयः ॥ मायाद्याश्चभवेद्वन्हेर्विस्फुलिंगायथात
था ॥ १३ ॥ सदाशिवेश्वराद्याश्चविद्याविद्येश्वरादयः ॥ अभवन्पुरुषाश्चान्याप्रकृतिश्चपरात्परा ॥ १४ ॥ महदादिविशेषां
ताख्वजाद्याश्चापिमूर्तयः ॥ यच्चान्यदपितत्सर्वमस्याःकार्यमितीरितं ॥ १५ ॥ साशक्तिस्सर्वगासूक्ष्माप्रबोधानंदरूपि
णी ॥ शक्तिमानुच्यतेदेवःशिवःशीतांशुभूषणः ॥ १६ ॥ वेद्यःशिवःशिवाविद्याप्रज्ञाचैवश्रुतिस्मृतिः ॥ धृतिरेषास्थिति
र्निष्ठाज्ञानेच्छाकर्मशक्तयः ॥ १७ ॥ आज्ञाचैवपरंब्रह्मद्वेविद्येचपरापरे ॥ शुद्धविद्याशुद्धकलासर्वंशक्तिकृतंयतः ॥ १८ ॥ न
मायाप्रकृतिर्जीवोविकारोविकृतिस्तथा ॥ नसन्नासच्चयत्किंचित्तयासर्वमिदंततं ॥ १९ ॥ सादेवीमाययासर्वंब्रह्माद्यं
सचराचरं ॥ मोहयत्यप्रयत्नेनमोचयत्यपिलीलया ॥ २० ॥ अनयासहसर्वेशःसप्तविंशप्रकारया ॥ विश्वंव्याप्यस्थित
स्तस्मान्मुक्तिरत्रप्रवर्तते ॥ २१ ॥ श्रुतिस्मृतिषुसर्वत्रपुराणेषुआगमेषुच ॥ बहुधोल्लेखिताःपक्षास्तर्केणवच्चसाश्रुतेः ॥ २२
तस्मात्सिद्धांतपंथानमाश्रित्यब्रह्मवादिनः ॥ सूत्राणांवेदशिरसामैकार्थ्यंप्राप्यमादरात् ॥ २३ ॥ लिंगांगसामरस्यार्थे
प्रवृत्तेवेदमूर्धनि ॥ लिंगेब्रह्माणिसर्वत्रह्यन्वयोनिश्चितोध्रुवं ॥ २४ ॥ अप्रामाण्यंतुसांख्यस्यस्मृतेर्योगस्मृतेःपरे ॥ प्रा

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि० माण्यमुररीकार्यंश्रोतव्येतिविधानतः॥२५॥तां योगमितिवाक्येनवेदचिन्हस्यदर्शनात्॥ योगस्मृत्याप्रधानस्यकार सा०
२७ णत्वस्यनिश्चयात्॥२६॥ब्रह्मकारणतावादी लिंगांगैक्यान्वयःपरे॥इतिचत्पौरुषेयत्वभ्रांतिदोषकलंकतः॥२७॥अपौ
रुषेययाश्रुत्याबाधोयुक्तःस्मृतेर्ध्रुवं॥ध्यानाद्यंशेस्मृतेस्तस्याःप्रामाण्यंन्यायगौरवात्॥२८॥श्रवणंमननंध्यानंश्रुति
स्मृत्यागमेषुच॥ऐककंठ्येनसर्वत्रयोगोयंप्रतिपादितः॥२९॥योगोनामहिसंमधोजीवात्मपरमात्मनोः॥ध्यानयोगे
तिवाक्येनयोगनिष्ठाउदाहृताः॥३०॥अंगंजीवःपरंलिंगंसामरस्यंतयोःशुभं॥ योगइत्युच्यतेसद्भिःशिवतत्वार्थवेदि
भिः॥३१॥वालाग्रमात्रंविश्वेशंजातवेदस्वरूपकं॥हृत्पद्मकर्णिकामध्येध्यात्वाधार्यंमुमुक्षुभिः॥३२॥सर्वज्ञंसर्वक-
धा तारंसमर्त्तारमद्भुतं॥प्रणवेनावृतंलिंगंप्रणवार्थंपरात्परं॥३३॥सर्वस्यजगतःसाक्षात्सृष्टिस्थित्यंतकारणं॥उमास
हायंकल्याणंनीलकंठंत्रिलोचनं॥३४॥प्रशांतप्रभुमीशानंधारयेद्धृदयांबुजे॥ब्रह्मयत्सच्चिदानंदंपरिपूर्णंचसर्वतः॥
॥३५॥सर्वत्रदृश्यतेनैवकरणागोचरत्वतः॥दृश्यतेतच्छरीरेस्मिन्तस्माद्ब्रह्मपुरंचतत्॥३६॥तस्मिंस्तुकमलाभंयंद
हरंहृदयांबुजे॥दहरं पुंडरीकाख्यंवेश्मप्रोक्तंमनीषिभिः॥३७॥तस्मिन्नवस्थितंब्रह्मतेनवेश्मेतिकीर्तितं॥तद्वे-
श्मवर्त्ततेदेहेतेनदेहःपुराभिधः॥३८॥यदस्मिन्वर्ततेलिंगंपुंडरीकाख्यवेश्मनि॥वियत्प्रमाणरूपत्वादाकाशाख्यंच
तद्भवेत॥३९॥कल्याणगुणरत्नानांनिधिमव्ययमद्भुतं॥आत्मातुदेहेसर्वत्रवर्तमानोपिशंकरः॥४०॥अतीवहृदयेत्व २७
स्यप्रकाशोनेतरेतथा॥अहंशब्दाभिधोह्यात्मानविवादोत्रकस्यचित्॥४१॥अहंशब्दंप्रयुंजानोलोकःसर्वोपिदृश्यते॥

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

हृदयंनिर्दिशत्येवब्रह्महंतत्रस्थितमततः॥४२॥यतोस्यहृदयेनित्यंप्रकाशोतीवविद्यते॥नतथान्यत्रतस्माच्चहृदयंहि
विशिष्यते॥४३॥तस्माद्धृदंबुजेधार्यंलिंगमाद्यंपुरातनं॥अतिवर्णाश्रमीसोयंसाक्षान्मोक्षैकभाजनं॥४४॥अयंमे
वहियोगोत्रसर्वशास्त्रार्थसंमतः॥योगस्मृतेस्तदंशेतुप्रामाण्यंनेतरत्रच॥४५॥यत्तुसांख्योक्ततर्केणविरोधोह्युप
दितः॥यद्यद्विलक्षणंसर्वंनतत्प्रकृतिकंविदुः॥४६॥रुचकाद्याययथासर्वेनमृत्प्रकृतिकाभवन्॥विमतंचजगत्स
र्वंब्रह्मोपादानकंनहि॥४७॥श्रुतिरित्यपिमात्रत्वाद्दुर्बलातर्कतोभवेत्॥तस्मात्तर्कोच्छ्रुतेबाधात्जगन्नब्रह्महेतुकं
॥४८॥जगतोचेतनत्वंतुविज्ञानंचेतिवाक्यतः॥ब्रह्मणश्चेतनत्वंतुयस्सर्वज्ञेतिवाक्यतः॥४९॥जगद्विलक्षणंब्र-
ह्मकथंनमनहेतुकं॥अपाणिपादत्वावाक्याच्चेतनत्वस्यनिश्चयात्॥५०॥भोक्तॄणामपिभोज्यानांवैलक्षिण्यंविलो
कितं॥श्वभ्यइत्यादिवाक्यानामधिष्ठानपरत्वतः॥५१॥बाध्योदृढीकृतस्तस्माज्जगन्नब्रह्महेतुकं॥इतिप्राप्तेदृश्य
तेतुयदुक्तंतन्मृषाभवेत्॥५२॥अचेतनाच्चेतनानामुत्पत्तिश्श्रूयतेश्रुतौ॥चेतनाद्धाचेतनानामिष्यतेश्रुतिसूत्रयोः
॥५३॥यथाकेशावृश्चिकाद्याःपुरुषाद्गोमयात्तथा॥सर्वात्मनाप्रागसत्वेह्यसत्कार्यंतदाभवेत्॥५४॥कार्यात्मनानिषे-
धोहिनतावत्कारणात्मना॥सत्वान्नासत्कार्यवादस्ततोत्राकारणात्मना॥५५॥परपक्षेपिदोषोयंतुल्यश्चायंभविष्य
ति॥शब्दहीनात्प्रधानाद्धिशब्दवत्कार्यनिश्चयात्॥५६॥नतुदृष्टांतभावाच्चयथावृक्षादयःश्रुताः॥तथास्वपक्षदो
षाच्चनसांख्यस्यावकाशता॥५७॥यश्चोभयोस्समोदोषःपरिवादोपिवासमः॥नैकःपर्यनुयोक्तव्यस्तादृगर्थविचा

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

रणे ॥५८॥ तर्केणप्रत्यवस्थानंश्रुत्युक्तेर्थेनरोचते ॥ तर्काणामप्रतिष्ठानांशुष्काणामन्यथाभवेत् ॥५९॥ अभियुक्तैः
कैश्चिदत्रकश्चिदन्यैर्निरूपितः ॥ अभियुक्ततरैरन्यैराभासीक्रियतेतथा ॥६०॥ यत्नवानुमितोप्यर्थःकुशलैरनु
मातृभिः ॥ अभियुक्ततरैरन्यैरयथैवोपपद्यते ॥६१॥ तर्काप्रतिष्ठितत्वंहितर्केणैवनिवार्यते ॥ केचित्तर्काःप्रतिष्ठाप्याः
केचित्तर्काःप्रतिष्ठिताः ॥६२॥ सर्वतर्काप्रतिष्ठानेदोषलेशोनचाभवेत् ॥ इदंतर्काप्रतिष्ठत्वंनसिध्येत्तर्कनिर्णये ॥६३॥
भोजनादौयथात्तर्कमूलत्वमितिचेन्नहि ॥ अनिर्मोक्षप्रसंगेनलौकिकस्तर्कसंग्रहः ॥६४॥ युक्तोपिकारणेयुक्त्या
पूर्वदोषोहिदृश्यते ॥ शिष्टापरिग्रहास्सर्वेव्याख्यातास्तेनकारणे ॥६५॥ भोक्त्रापत्तेरप्यविभोगश्चेत्स्याल्लोकवद्भु-
वे ॥ ब्रह्मात्मनाभोक्तृभोग्यभोगानांलोकवद्यथा ॥६६॥ अभेदेपिस्वरूपेणविभागोनिश्चितःपरः ॥ अभेदकार-
णात्तस्मात्कार्यस्याध्यवसीयते ॥६७॥ तदारंभणशब्दादिभ्योन्यात्तन्निश्चयस्तथा ॥ सभावेचोपलब्धिश्चसस
त्वाच्चावरस्यच ॥६८॥ असद्व्यपदेशान्नेतिचेन्नवाक्यशेषात्सनिश्चितः ॥ धर्मांतरेतद्वाक्यंचतदर्थेपर्यवस्यति ॥६९॥
युक्तःशब्दांतराच्चात्रपटवच्चतथाभवेत् ॥ इतरव्यपदेशाद्धिसूत्रेणापिसनिश्चितः ॥७०॥ अधिकंभेदनिर्देशाद्ब्र
ह्मसृष्टेतुनेतरत् ॥ अश्मादिवच्चतदनुपपत्तिर्दृश्यतेयतः ॥७१॥ उपसंहारसूत्रेणब्रह्मणःपरिणामिता ॥ अंगी
कृतप्रपंचस्यक्षीरवद्धीतिनिश्चयः ॥७२॥ कृत्स्नप्रसक्तिसूत्रेणसएवप्रतिपादितः ॥ तथाहिपरिणामाःकिंकार्त्स्न्ये-
नांशेनवाभवेत् ॥७३॥ कार्त्स्न्येनपरिणामश्चेद्ब्रह्मभावःप्रसज्यते ॥ अंशेनपरिणामश्चेद्ब्रह्मसावयवंभवेत् ॥७४॥ तद- २८

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

र्थकश्रुतिःकुप्येत् निष्क्रियंनिष्कलंत्विति ॥पूर्वरूपपरित्यागेनास्यरूपसमुद्भवः ॥७५॥तथासतिजडंब्रह्मस्या
न्नस्यादजडंपुनः ॥श्रुतेस्तुशब्दमूलत्वात्तब्रह्मणोजगदात्मना ॥७६॥परिणामोजडंब्रह्मपृथगेवेतिगीयते ॥उ
क्त्वाते जीवन्नसृष्टिंतत्सेयंदेवतैक्षत ॥७७॥हंताहमितिवाक्येनतेजोबन्नत्रयंविना ॥उक्त्वादीक्षितृत्वेनदेवता क
याश्चशब्दतः ॥७८॥अंगीकार्येयथाशब्देदेवतावस्थितिःपृथक् ॥प्रयोजनेनतर्केणश्रुत्यायत्रविधीयते ॥७९॥
श्रुतेस्तुशब्दमूलत्वाद्देवादिवदपीष्यते ॥आत्मकृतेश्चसूत्रेणपरिणामोत्रनिश्चितः ॥८०॥एवंस्वपक्षदोषाश्चसए
वसुदृढीकृतः ॥देवानांपरिणामोत्रशक्तियोगान्नुश्रुतौ ॥८१॥नब्रह्मणस्ततःसूत्रेसर्वोपेतेतिदर्शितं ॥नन्वेव
र मपिदेवानांस्रष्टृत्वेकर्णेर्यतः ॥८२॥ब्रह्मणोकरणत्वेन नेतिचेदुक्तमेवतत् ॥कर्णत्वानेतिचेत्त दत्रैवानुपदंय- र
तः ॥८३॥नप्रयोजनवत्वात्तद्ब्रह्मणोनतथेतिचेत् ॥लोकवत्विति सूत्रेणयथाराज्ञोतथाभवत् ॥८४॥वैषम्यंनिर्घृ-
यु णत्वेचब्रह्मणोनैवं ज्यते ॥तस्मात्कथंब्रह्मणस्तदितिचेदुत्तरत्रच ॥८५॥वैषम्येतिचसूत्रेणपरिहारःप्रदर्श्यते ॥
ततःसंदिग्धदोषेपिनब्रह्मेतिचसूत्रतः ॥८६॥उपपद्यतइत्यादिसूत्रेणापिसमर्थितं ॥सर्वधर्मोपपत्तेश्चसाक्षि
त्वंब्रह्मणोभवत् ॥८७॥तस्माच्छक्तिविशिष्टंतद्ब्रह्मैकंशाश्वतंपरं ॥उपादानंनिमित्तंचब्रह्मैवेतिप्रदर्शितं ॥८८॥आ
त्मलिंगेत्यादिवाक्येर्यन्निर्णीतंमनीषिभिः ॥विचारितंतदेवात्रश्रुतिस्मृत्युपब्रह्मणैः ॥८९॥आस्माकीनार्थसिद्धांत
सरणिस्संप्रदर्श्यते ॥यदुक्तंपरिणामांशेतदग्रेविस्तरान्मया ॥९०॥ब्रह्मकारणतावादेसांख्याद्यैर्दुषणंचयत् ॥पुरस्ता

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि० त्तत्परिहृतमधुनातेषुदूषणं ॥९१॥ क्रियतेतत्रप्रेक्षावत्प्रवृत्तिर्नभवेदिति ॥ एवंहिसांख्यामन्यंतेयेविकारायदन्- सा०
२९ विताः ॥९२॥ दृष्टास्तेतत्प्रकृतिकायद्वद्घटाद्यामृदन्विताः ॥ यथातेमृत्प्रकृतिकाएवमेवाखिलंजगत् ॥९३॥ सुखदुः-
खाद्यन्वितंचतादृक्प्रकृतिकंभवेत् ॥ यद्यत्सुखादिसामान्यात्मकंतत्त्रिगुणंभवेत् ॥९४॥ येवैपरिमिताभावास्तेवैसं-
सर्गपूर्वकाः ॥ यथांकुराद्यस्तद्वदेतत्परिमितंजगत् ॥९५॥ सत्वंरजस्तमश्चैतत्त्रयंसंसर्गपूर्वकं ॥ कार्यकारणभावे-
नप्रधानमनुमीयते ॥९६॥ नजगत्कारणंब्रह्मचैतन्यानन्वयाज्जडे ॥ नप्रधानंजगद्धेतूरचनानुपपत्तितः ॥९७॥ प्रा-
सादशैय्यारचनाप्रज्ञावच्छिल्पिकर्तृका ॥ नाचेतनैस्तुपाषाणैरचनीयमिदंजगत् ॥९८॥ नानाकर्मोपभोगानांस्थानं
ब्राह्मंचविग्रहः ॥ संभावितेश्शिल्पिभिर्वामनसाचिंत्यभेदवान् ॥९९॥ अचिंत्यशक्तिविभवसर्वज्ञेश्वरनिर्मितं ॥ नचेत
नप्रधानेनतथेत्युक्त्वाप्यदर्शनात् ॥२००॥ समुच्चिनोतिवैशब्दः अन्वयानुपपत्तिकां ॥ कल्पनायाअथनहिभावास्ते
चघटादयः ॥१॥ सुखदुःखान्वितादृष्टाःसुखादेरंतरत्वतः ॥ बाह्यत्वाच्चघटादीनांसुखहेतुत्वदर्शनात् ॥२॥ संसर्गपू-
र्वकत्वानुभूतेःपरिमितत्वतः ॥ तदनैकांतिकंसत्वादीनांपरिमितावपि ॥३॥ संसर्गपूर्वकत्वस्याभावाच्चापिप्रवृत्ति-
तः ॥ प्रधानस्याचेतनस्यचेतनाधिष्ठितस्यच ॥४॥ प्रवृत्तिर्नोपपन्नाहितथालोकेप्यदर्शनात् ॥ चेतनाधिष्ठितरथे
प्रवृत्तिर्नैवकेवले ॥५॥ औदासीन्याभ्युपगमात्पुरुषोनप्रवर्तकः ॥ अचेतनमपिक्षीरंवत्सवृध्येप्रवर्तते ॥६॥ स्वयंलो- २९
कोपकारायस्यंदतेचनदीजलं ॥ नैवंतत्रव्यपेक्षायाःसत्ताश्रुत्यापिदर्शिता ॥७॥ योप्सुतिष्ठन्नितिततोव्यतिरेकानव

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

स्थितेः॥प्रधानंनामसांख्यानांसत्वादीनांसमानता॥८॥नैवतद्व्यतिरेकेणप्रधानस्यप्रवर्तकं॥निवर्तकंवायत्किंचि
दुदासीनस्तुपूरुषः॥९॥नैवप्रवर्तकोनापिनिवर्तकइतिस्मृतः॥ततस्तदनपेक्षत्वात्सर्गस्यात्सर्वदापुनः॥१०॥प्रलयो
नकदाचित्स्यान्नप्रधानमतोभवेत्॥उपयुक्तंतृणजलंस्वयमेवपयोयथा॥११॥स्वयमेवप्रधानंचमहदाद्याकृतिं
वृजेत्॥नैवतृणादिनमतेस्वयंक्षीरात्मनापुनः॥१२॥अन्यत्रतुतथाभावाल्लोकेह्यनडुदादिभिः॥उपयुक्ततृणादीनि
क्षीरत्वंयांतिकिंपुनः॥१३॥किंतुधेन्वैवोपयुक्तंप्रवृत्तिरथवाभवेत्॥नतथापीहयुज्येतयतोनाप्तिप्रयोजनं॥१४॥
प्रवृत्तेरभ्युपगमेप्यंतरेणप्रयोजनं॥प्रवृत्तिःपुरुषार्थायप्रतिज्ञाभंगसंभवात्॥१५॥अतःप्रयोजनंवाच्यंनप्रधा
नस्ययुज्यते॥अचेतनत्वात्तस्याथपुरुषस्यभवेद्यदि॥१६॥भोगोवाप्यपवर्गोवाचोभयंवेतिसंशयः॥नानादेया
द्यतिशयेपुरुषेभोगसंभवः॥१७॥अनिर्मोक्षप्रसंगश्चनापवर्गोपिवैपुनः॥अपवर्गस्यसिद्धत्वान्नित्यमुक्तोहिपू
रुषः॥नोभयार्थविरोधान्नपरियायेणोभयार्थका॥१८॥भोक्तव्यार्थस्यचानंत्यात्भोगापरिसमाप्तितः॥अपवर्ग
सिद्धिरेवनजौत्सुक्यनिवृत्तये॥१९॥प्रवृत्तिर्हितदौत्सुक्यंधर्मोयच्चेतनस्यतत्॥नप्रधानेसंभवतिनप्रवृत्तिरथो
भवेत्॥२०॥कश्चिद्दृक्शक्तिसंपन्नःप्रवृत्तौशक्तिवर्जितः॥पंगुर्दृक्शक्तिहीनंतुप्रवृत्तौशक्तिमन्नरं॥२१॥प्रवृत्तेय
त्यधिष्ठायतथाकांतोमणिस्वयं॥प्रवृत्तिरहितोपिस्यादयसस्तुप्रवर्तकः॥२२॥एवंदृक्शक्तिसंपन्नःपुरुषस्तुप्रव
र्तयेत॥प्रवृत्तिशक्तिसंपन्नंप्रधानमितिचेन्नच॥२३॥दोषान्निर्मोक्षविरहादभ्युपेतविरोधतः॥प्रधानस्यस्वतं

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि० त्रस्यप्रवृत्तिरूपवर्ण्यते ॥२४॥ प्रवर्त्तकत्वाभावेनपुरुषस्यकथंपुनः ॥ यदनादेयातिशयःपुरुषस्यात्प्रवर्त्तकः ॥२५॥ सा०
३० वाग्व्यापारेणचेदंधंस्वयंपंगुःप्रवर्तयेत् ॥ नपूरुषेस्तिव्यापारःकांतश्चेत्सन्निधानतः ॥२६॥ परिमार्जनतोवास्याद
यस्तुप्रवर्त्तकः ॥ नैवसान्निध्यमात्रेणपुरुषस्यात्प्रवर्त्तकः ॥२७॥ सन्निधेरत्रनित्यत्वात्प्रवृत्तेःसंगसंभवः ॥ पुरुषोश्मा
दिवदितिनवक्तुंशक्यतेततः ॥२८॥ अंगित्वानुपपत्तेश्चप्रवृत्तिर्नप्रधानके ॥ साम्येनैवावस्थितानांसत्वादीनांपरेल
ये ॥२९॥ वैषम्यहेत्वभावेननांगित्वंहिपरस्परं ॥ वैषम्यंयदिवर्ण्येततदानींकारणंविना ॥२३०॥ प्रवृत्तिःसर्वदैवस्या
न्नैवंवक्तुंहिशक्यते ॥ अनंतरोक्तदोषस्यान्नतथाचानुमीमहे ॥३१॥ अनपेक्षस्वभावास्तेकूटस्थाश्चगणायदि ॥ स्वभा
वश्चतथातेषांयथाकार्योपपत्तिकः ॥३२॥ गुणवृत्तंचलमितितनोवैषम्यसंभवात् ॥ प्रवृत्तिरूपपद्येतेत्येवंचेदुपव
र्ण्यते ॥३३॥ प्रधानस्याज्ञयाशक्त्यायोगेनस्वरसेनतु ॥ रचनानुपपत्त्याद्यादोषास्तेतदवस्थिताः ॥३४॥ ज्ञशक्तिंच
मिमानस्तुवादित्वात्सनिवर्त्तते ॥ ब्रह्मवादप्रसंगाश्चनैतद्युक्तिसहंभवेत् ॥३५॥ गुणवैषम्ययोग्यास्तुनिमित्ताभाव
तोलये ॥ वैषम्यंनभवेन्नैवंनिमित्ताभावतःपुनः ॥३६॥ कदाचिदपिवैषम्येनभजेरन्गुणास्तुते ॥ अभावेननिमित्ता
नांविशेषादेवचेत्ततः ॥३७॥ अनित्यानुपपत्तिस्तुतदवस्थितमेवतत् ॥ परस्परविरुद्धश्चसंख्याभ्युपगमस्त्वयं ॥३८॥
क्वचित्सप्तेंद्रियाण्यवोक्तामंत्येकादशक्वचित् ॥ क्वचिद्वदंतिमहतःपंचतन्मात्रसंभवः ॥३९॥ तथाक्वचिदहंकारस्त्रीण्यं ३०
तःकरणानिच ॥ क्वचिदेकमितिप्राहुरित्येवंबहुधापुनः ॥२४०॥ श्रुत्याकारणवादिन्यास्मृत्याचापिपरस्परं ॥ विरोधात्मा

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

खिलेचैतन्मतंतदसमंजसं ॥४१॥ तथाचैवंप्रधानस्यकारणत्वेनिराकृते ॥ इदानींपरमाणूनांकारणत्वंनिरस्यते ॥४२
परमाणुश्चतुर्थादौनिश्चितेप्रलयेपरे ॥ पारिमांडल्यसंज्ञावत्परिमाणेनयोगितः ॥४३॥ यथास्वस्पर्शवंतश्चतिष्ठंतिप
रमाणवः ॥ पश्चात्तस्मिन्सृष्टिकालेपरमेशसिसृक्षया ॥४४॥ सादृष्टसात्मकानेयसंयोगाच्चपरस्परं ॥ अणुष्वाद्यंभवे
त्कर्मकर्मणातेनचाप्युणुः ॥४५॥ परमाण्वंतराइतोद्वाभ्यांद्वाभ्यांततःपरं ॥ संयुक्ताभ्यामणुभ्यांस्यादेकैकंद्व्यणुकंततः ॥
॥४६॥ नत्वेकस्मात्तुसंयुक्तेतंतूनांदर्शनेनतु ॥ पटारंभकतायास्तुतथामूलेपिकारणे ॥४७॥ तत्तद्वौपरमाणूतुकारणंस
मवाइच ॥ तत्संयोगःकारणंस्यात्संज्ञयासमवाइतु ॥४८॥ अदृष्टादिनिमित्तंस्यात्परणुगतास्तुते ॥ स्पर्शादयोगुणास्ते
भ्योद्व्यणुकेतुल्यजातयः ॥४९॥ स्पर्शादयोगुणाजाताःकारणस्थागुणायतः ॥ कार्येगुणानारंभतइतिन्यायात्तथात्रिभिः ॥
॥२५०॥ द्व्यणुकैर्योगसचिवैरेकैकंद्व्यणुकंततः ॥ महदारभ्यतइतिद्व्यणुकस्थाःपुनर्गुणाः ॥५१॥ त्र्यणुकेस्पर्शमुख्यानांस्व
ताश्चआरंभकाइति ॥ महत्तरंचत्र्यणुकेर्महत्तममितिक्रमात् ॥५२॥ महान्वायुर्महत्तेजोमहापोमहतीमही ॥ उत्पद्यंते
ब्रह्मणोनजगदुत्पत्तिरुच्यते ॥५३॥ चैतन्यस्यगुणस्यास्यचैतन्यांतरहेतुता ॥ तत्रवैशेषिकैर्ब्रह्मकारणत्वेयदुच्यते ॥५४
सदोषोनेनसूत्रेणसम्यगेवनिवार्यते ॥ महत्त्वयंननियमःसाधुःसर्वत्रसंमतः ॥५५॥ यत्कारणगुणाःकार्येसजातीयगु
णांतरे ॥ आरंभंतेवश्यमितियतश्चपरमाणुषु ॥५६॥ पारिमाडल्यसंज्ञस्यद्व्यणुकेतादृशस्यतत् ॥ आरंभानस्युपगमात्त
स्याणुत्वादिदर्शनात् ॥५७॥ यथाकारणनिष्ठेयेअणुताह्रस्वतेउभे ॥ द्व्यणुकेणुत्वह्रस्वत्वेसजातीयेनकारणे ॥५८॥ महत्त्वंचे

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि० वदीर्घत्वंत्र्यणुकेदृश्यतेयतः ॥ तथाचकारणस्थानांगुणानामेवकार्यता ॥५९॥ सजातीयगुणानारंभकत्वमितिवे॰ सा०
३१ स्थितिः ॥ एवंब्रह्मगुणस्यापिचैतन्यस्यतुकार्यता ॥६०॥ चैतन्यांतरहेतुत्वेसहसानोपपद्यते ॥ ब्रह्मप्रपंचहेतुत्वेनैव
काचिदसंगतिः ॥६१॥ नविशेषगुणानांतुसजातिगुणहेतुता ॥ परिमाणादिसामान्यंगुणानांनोच्यतामिति ॥६२॥ सा
मान्यत्वेविशेषत्वेगुणानांवादमात्रतः ॥ इदानींपरमाणूनांकारणत्वंनिरस्यते ॥६३॥ प्रलयेनिश्चलेष्वेषुचायुक्तपरमा
णुषु ॥ संयोगोत्पत्तयेचाद्यंकर्मतत्रनिमित्तकं ॥६४॥ किंचिदस्तिनवानैवंनिमित्ताभावतस्तदा ॥ कर्माभावस्तथात्येकिं
निमित्तंदृष्टमेववा ॥६५॥ अभिघातप्रयत्नादिकिमुतादृष्टमुच्यते ॥ नाद्यःशरीराभावेनप्रयत्नादेरसंभवात् ॥६६॥
अदृष्टत्वाचेतनत्वान्नकर्मोत्पादकंत्वतः ॥ पुरुषोजातचैतन्योजडप्रायोभवेद्यतः ॥६७॥ ईशज्ञानस्यनित्यत्वात्कर्मोत्प
त्तिःसदाभवेत् ॥ तथादृष्टवदात्माभ्यांसंयोगस्यापिसंभवात् ॥६८॥ आगंतुकनिमित्तस्याप्यभानाद्यस्यकस्यचित् ॥ अ
णुष्वाद्यंनकर्मस्यात्संयोगस्तन्निबंधनः ॥६९॥ नस्यात्संयोगभावेनद्व्यणुकत्वनिबंधनं ॥ तस्मान्नोपपन्नःपरमाणोः
कारणवादकः ॥७०॥ परमाणोर्हेतुवादेहिकार्यंयद्व्यणुकादिकं ॥ अणुभ्यामितिभिन्नंहिसमवायाभिधेनच ॥७१॥ संब
न्धेनद्व्यणुभ्यांतुसंबन्धंवर्णयंतिहि ॥ तद्वर्णनंनोपपन्नंसाम्यादप्यनवस्थितेः ॥७२॥ यथाहिकार्यमत्यंतंभिन्नत्वात्स
मवाइनां ॥ संबंधेनतुसंबंधंवर्णयंतिविपश्चितः ॥७३॥ एवंचसमवायस्यसमवाइत्वतस्तथा ॥ तस्मादत्यन्तभिन्नत्वा ३१
द्द्रव्यमन्येनकेनचित् ॥७४॥ संबन्धेनतथातस्यतस्यापीत्यनवस्थितेः ॥ नस्वयंसमवायस्यसंबंधेकस्वरूपिणः ॥७५॥

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

अनपेक्ष्यान्यसंबंधंसंबध्यतइतिभ्रमः॥तथाप्यत्यंतभेदेस्मिन्संबंधस्यात्यपेक्षणात्॥७६॥संयोगस्यान्यथात्तस्यस
मवायानपेक्षणात्॥नचतस्यगुणत्वेनसंयोगाद्यनपेक्षणं॥७७॥गुणद्रव्यव्यवस्थायाःपरिभाषणमात्रतः॥तेप्रवृत्ति-
स्वभावाःकिंकिंनिवृत्तिस्वभावकाः॥७८॥अथोभयस्वभावावानोभयेपरमाणवः॥वाद्यःक्षोदक्षमःपक्षःप्रवृत्तेर्नित्यताव
शात्॥७९॥आपतेत्प्रलयाभावोनद्वितीयोनिवृत्तितः॥सर्गाभावप्रसंगाच्चनतृतीयोपियुज्यते॥८०॥द्वयोःस्वभावयोस्त
त्रविरोधादप्यसंभवः॥नचपक्षस्तुरीयोपिविदुषांहृदिरोचते॥८१॥यन्नोभयस्वभावत्वेप्रवृत्तिस्तुनिमित्ततः॥अदृष्टादे
र्निमित्तस्यसंन्निधानेनसर्वदा॥८२॥नित्यंप्रवृत्तिस्सज्येतनाणुकारणतातततः॥विभज्यमानेयद्द्रव्यंतच्चसावयवंपुनः॥८३
यतःपरंविभागायनार्हेयुपरमाणवः॥चतुर्विधारूपवंतःचतुर्भेदस्यरूपिणः॥८४॥भूतिभौतिकजालस्यनित्याआरंभ
काइति॥वैशेषिकाणांसिद्धांतआपाताद्रमणीयकः॥८५॥रूपादिमत्पराणूनामणुत्वेनित्यताद्वयं॥विपर्येतितथालोके
दृष्टत्वाद्यधिरूपवत्॥८६॥स्वकारणापेक्षयातद्दनित्यंस्थूलमेवच॥यथापटादितद्वच्चरूपिणःपरमाणवः॥८७॥
स्थूलाअनित्यास्तेचस्युःननद्रव्यविनाशने॥हेतोरंशविनाशस्यतद्विभागस्यचात्रतु॥८८॥अभावात्परमाणूनां
विनाशइतिमावद॥गुणद्रव्यव्यवस्थायाःपरिभाषणमात्रतः॥८९॥यथावयवनाशादिविरहेपिपराणुषु॥रूपा
दीनांसंगतानांवह्निसंयोगनाश्यत॥९०॥संभवेत्परमाणूनांनाशस्तस्मादनित्यता॥गंधरूपरसस्पर्शगुणस्थू
लामहीतथा॥९१॥रसरूपस्पर्शगुणसूक्ष्माआपःसमीरिताः॥रूपस्पर्शगुणंसूक्ष्मंपरंतेजःप्रदृश्यते॥९२॥स्पर्शसू

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि॰ क्ष्मतयावायुर्भुतान्येतानिवैपुनः ॥ गुणेरूपचितेश्चापितथैवापचितेर्गुणेः ॥ ९३ ॥ भूतानिस्थूलसूक्ष्माणितारतम्यान्वि सा॰
३२ तानिच ॥ तद्वत्पराणवोप्यत्रगुणैरपचितैस्तथा ॥ ९४ ॥ युक्तागणैरपचितैकल्पेरन्नितितार्किकाः ॥ नवाचोभययथादोषः
परिहारस्ययुक्तिभिः ॥ ९५ ॥ तावत्कल्प्याउपचितागुणाअपचिताश्चचेत् ॥ मूर्तेरूपचयश्चापचयश्चापिप्रसज्यते ॥ ९६
मूर्तेरूपचयंचापितथैवापचयंविना ॥ नगुणानामुपचयस्तथैवापचयेविना ॥ ९७ नहि ॥ ९७ ॥ तथाकार्येषुदृष्टत्वातुलो
केविद्वज्जनैःसदा ॥ मूर्तेरूपचयेवापितथैवापचयेसति ॥ ९८ ॥ भवेदपरमाणुत्वप्रसंगस्तद्दतोनच ॥ आकल्प्यमानेप
चयेतथैवोपचयेगुणे ॥ ९९ ॥ तथाचतुर्गुणाःसर्वेजलेगंधोपलंभनं ॥ तेजस्येवंगंधरसौगंधरूपरसास्तथा ॥ ३०० ॥ वा-
योसर्वेयदिपुनरेकैकगुणशालिनः ॥ तदातेजसिनस्पर्शोजलेरूपरसौनहि ॥ १ ॥ पृथ्व्यांरूपरसस्पर्शाःनस्युर्नैवंहिदृश्य-
ते ॥ तदतःपरमाणूनांहेतुवादोनयुज्यते ॥ २ ॥ अत्यंतमनपेक्षाचमन्यादेरपरिग्रहात् ॥ सांख्यन्यायमतेचोभेनिरस्तेब
हुयुक्तिभिः ॥ ३०३ ॥ गणाचारविरोधोपियथानप्रसरोसरेत् ॥ गुरुलिंगादिविषयंनश्राव्यंदूषणंयदि ॥ ४ ॥ श्रुतवानूश्री
श्रयामीतिगणाचारःसउच्यते ॥ सांख्येनतार्किकेणापिदूषणत्वेनकल्पितं ॥ ३०५ ॥ यद्यतत्स्मरणंवापिमनसानक-
तं त्वामया ॥ किंतुतेषामभिमतंनिरस्तंयुक्तिभिर्मया ॥ ६ ॥ तथैवदृश्यतेधर्मसंगतेधर्मदूषके ॥ तद्दूषणमश्रण्वंस्त-
त्स्थानात्तंतुप्रवासयेत् ॥ ७ ॥ तंडुलान्सिकतैर्मिश्रान्पृथक्कृत्ययथाहेत् ॥ बौद्धाद्यभिमतार्थेषुनिरस्तंदुर्वचःकि- ३२
मु ॥ ८ ॥ विज्ञानरत्नंगृह्णामितत्रक्षणिककांत्यजन् ॥ युक्तिभिर्दोषघातज्ञःशाणोल्लीढंमणिंयथा ॥ ९ ॥ निरस्यतेतथैबौ

CC.0- Jangamwadi Math Collection. Digitized by eGangotri.

द्धानामिदानींत्रिविधंमतं॥सर्वास्तित्ववदंत्येकेकेचिद्विज्ञानमात्रकं॥३१०॥शून्यवादिसएवैकेसर्वास्तित्वंनिरस्यते॥
तत्रतेषांप्रयेषाचपृथ्व्यादीनांचतुष्टये॥११॥खरस्नेहोष्णेरणस्वभावास्तेपरमाणवः॥संहन्यंतेपृथिव्यादिभावेनेति
ततस्तथा॥१२॥वेदनारूपविज्ञानंसंज्ञासंस्कारभेदतः॥पंचस्कंधास्तथाध्यात्मंसर्वरूपेणवैपुनः॥१३॥व्यवहारास्पद
तयासंहन्यंतेथतत्रच॥रूपस्कंधस्सवीर्याणिइंद्रिणीतिबभ्रमुः॥१४॥विज्ञानस्कंधनामासावहमाकारएवच॥रूपा
दिविषयश्चासाविन्द्रियादिसमुद्भवः॥१५॥ज्ञायमानोवेदनाख्यस्कंधस्सतुसमीरितः॥सुखास्यानुभवश्चापिदुः।
खस्यानुभवस्तथा॥१६॥संज्ञास्कंधःसविज्ञेयोविशिष्टोल्लेखनावयं॥सविकल्पप्रत्ययस्तुसंस्कारस्कंधउच्यते॥१७
क्लेशारागादयश्चैवमदमानादयस्तथा॥उपक्लेशास्तथाधर्माधर्मौचपरिकीर्तिताः॥१८॥पंचस्कंधीतत्समूहस्तत्राधा
बिदमुच्यते॥द्विप्रकारस्समुदयोयोयंचोभयहेतुकः॥१९॥सचभौत्तिकसंघातोनणुहेतुस्कंधहेतुकः॥स्कंधिरूप-
स्ततस्तस्मिन्नुभयस्मिन्नपिक्रमात्॥३२०॥स्यादभिप्रायमाणेतदप्राप्तिःकिलसाभवेत्॥समुदायाप्राप्तिरितितस्या
संगतिरुच्यते॥२१॥स्वतसंघात्तविरहेजडत्वात्समुदायिनः॥समूहसिध्यधीनत्वाच्चित्ताभिज्वलनस्यच॥२२॥अं
न्यस्यचेतनस्यात्रसंहंतुर्विरहाततः॥सर्वत्रक्षणिकत्वस्यतथाचप्रतिपादनात्॥२३॥संहन्ताचेतनःकश्चित्स्थिरो
नाभ्युपगम्यते॥तथाप्यविद्यामुख्यानांकारणत्वात्परस्परं॥२४॥संगच्छतेलोकयात्रातेचाविद्यादयःपुनः॥अवि
द्याचैवसंस्कारोविज्ञानंनामरूपकं॥३२५॥स्यात्षडायतनंस्पर्शोवेदनाचततःपरं॥तृष्णाविद्याप्युपादानंभवोजाति

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि॰ स्तथैवच ॥२६॥ स्याज्जरामरणंशोकस्तथैवपरिदेवना ॥ ततोदुःखंदुर्मनस्तेत्येवंजातीयकाइमे ॥२७॥ अन्योन्यहेतुः सा॰
३३ कास्तेषांसमयेंगीकृताःपुनः ॥ अविद्याभ्रांतिरित्युक्तासंस्कारोरागपूर्वकः ॥२८॥ विज्ञानंवस्तुविषयंज्ञानमित्युपव-
र्णितं ॥ चत्वारस्युरूपादानस्कंधानामपदाभिधाः ॥२९॥ स्कंधैस्तैरभिनिर्वर्त्यादेहस्यकललादिका ॥ अवस्थाबुद्बुदा-
द्यायासोरोप्यमितिवर्णिता ॥३०॥ ततूषडायनंप्राहुरिंद्रियाणितुतानिषट् ॥ नामरूपेंद्रियाणांसंनिपातस्पर्शउच्यते ॥
॥३१॥ वेदनासुखदुःखादिमयिसंग्राह्यमित्यदः ॥ तृष्णात्वध्यवसायःस्यादुपादानंततोविदुः ॥३२॥ वाक्कायचेष्टासंभूतोध
र्मोधर्मोवितिस्फुटं ॥ प्रादुर्भावोजातिरितिपरिपाकोजरेतिच ॥३३॥ स्कंधानांचैवजातानांतन्नाशंमरणंविदुः ॥ शोकस्तु
म्रियमाणस्ययअंतर्दाहईरितः ॥३४॥ प्रलापनंतदुथ्थंतुकीर्तितापरिदेवना ॥ पंचविज्ञानकार्यैस्तदसाध्यानुभवस्मृतः
॥३५॥ तद्दुःखंमानसंदुःखंदुर्मनस्तेतिगीयते ॥ यथाबीजादंकुरःस्यादंकुरात्पत्रमेवच ॥३६॥ पत्रात्कांडंततोनालोनालाद्ग
र्भंततःपरं ॥ गर्भाच्छूकस्ततःपुष्पंपुष्पात्फलमितिक्रमात् ॥३७॥ एषामचेतनत्वेपिबीजादीनामसत्यपि ॥ अधिष्ठात
रिचान्यस्मिन्यथावान्योन्यमत्रतु ॥३८॥ कार्यकारणभावोहिदृश्यतेतद्दिहापिच ॥ जन्मादिहेतवोज्ञेयाअविद्यादयई
रिताः ॥३९॥ जन्मादयश्चविज्ञेयाअविद्याहेतुकाइति ॥ आवर्तमानादृश्यंतेघटीयंत्रवदत्रच ॥३६०॥ अर्थाक्षिप्तस्तदैतैःस
संघातइतिचेन्नच ॥ तेषामुत्पत्तिमात्रत्वात्संघातस्तर्हियुज्यते ॥४१॥ निमित्तमवगम्येतसंघातस्ययदित्वया ॥ परस्प ३३
रप्रत्ययत्वेप्यविद्यादेस्तथापुनः ॥४२॥ पूर्वपूर्वंनिमित्तंस्यादुत्तरोत्तरसंभवे ॥ संघातापत्तिहेतुत्वंनैवक्वाप्युपपद्यते ॥४३॥ अ

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

र्थादाक्षिप्यतेसंघअविद्यापूर्वकेरिति॥यद्यविद्यादयःसंघमंतरेणात्मसंभवं॥४४॥अलब्ध्वापेक्षसंघातमपेक्षंतइतीर्य
ते॥संघातस्यततस्तस्यनिमित्तंकिंचिदुच्यतां॥४५॥नेह्यपेक्षामात्रतस्तन्निमित्तंसिध्यतिस्वतः॥संघातस्यत्वविद्याद्या-
निमित्तमितिचेन्नहि॥४६॥कथंतमेवचाश्रित्यलब्ध्वात्मानंपुनस्वयं॥तस्यैवस्युर्निमित्तंचसंसारेनादिकेत्वथ॥४७॥सात-
त्यैनैवसंघातउत्पद्यतइतीर्यते॥तथापितस्मात्संघातात्संघातांतरसंभवः॥४८॥सदृशोनियमेनैवभवेदनियमेनवा॥
विरुद्धंसदृशंवेतितत्राद्येशृणुवक्ष्यते॥४९॥नकदापिमनुष्यस्यदेवाद्याप्तिःकदाचन॥द्वितीयेतुक्षणेहस्तीभूत्वा
देवोभवेन्नरः॥३५०॥नियामकस्याभावादप्यभावस्थायिकर्मणः॥अंगीकृत्यत्वविद्यादेरुत्पत्तौचनिमित्तता॥५१॥
संघातसिद्धिर्नैसुक्तंवाचाप्युत्पत्तिहेतुना॥इदानींनेतिवक्ष्यामिएवंहिक्षणवादिनः॥५२॥पूर्वपक्षणेनिरुध्यतेचो
त्य दयेतूत्तरक्षणे॥पूर्वोत्तराख्यक्षणयोरेवमभ्युपगच्छता॥५३॥वाच्योहेतुफलाभावोनवक्तुंशक्यतेक्वचित्॥पूर्वक्षण-
स्यरुद्धस्यरुध्यमानस्यवापुनः॥५४॥तथाभावग्रस्ततयानोत्तरक्षणहेतुता॥कार्यान्वितानांमृत्स्वर्णादीनांदृष्टाहि
हेतुता॥५५॥ग्रस्तस्यनैवाभावेनदृश्यतेकार्यहेतुता॥क्षणभंगाख्यवादेतुहेतुःपूर्वक्षणोनहि॥५६॥निरोधेनग्रस्तत-
याचोत्तरस्येतिकीर्तितं॥अथहेतावसत्येवफलोत्पत्तिंवदेद्यदि॥५७॥तत्प्रतिज्ञोपरोधस्याच्चतुर्हिहेतून्प्रतीत्यच॥चि
त्ताच्चैत्तोत्पत्तिरितिप्रतिज्ञाहानिरापतेत्॥५८॥चित्तंविज्ञानमाख्यातंचैत्तास्तेचसुखादयः॥नीलावभासज्ञानस्य-
नीलालंबप्रतीतितः॥५९॥भवेन्नीलाकारताद्यानतस्तुसमनेतवान्॥पत्ययात्पूर्वविज्ञानान्मनसोमोधरूपता॥३६०॥दृशः

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

सा०

क्रि० प्रतिप्रत्ययाच्चरूपग्रहउदाहृतः॥सहकारिप्रत्ययाच्चालोकात्स्पष्टार्थतापुनः॥६१॥कारणानितुचत्वारिचैत्ता-
३४ नामितियापुनः॥प्रतिज्ञावरूणाभावेचोपरुध्येतकेवलं॥६२॥अथोत्तरक्षणोत्पत्तिपर्यंतमवतिष्ठते॥पूर्वक्षणश्चे
त्तद्योगपद्यंहेतोःफलस्यच॥६३॥तथाचक्षणिकाःसर्वेप्रतिज्ञेतिनसंभवेत्॥विनाशिकाःकल्पयन्तिनानाभेदेनवै
पुनः॥६४॥बुद्धिर्बोध्यंतथाबोद्धात्रयादन्यत्तुसंस्तुतं॥क्षणिकंचेतितदपित्रयंचक्रमशोविदुः॥६५॥प्रतिसंख्या
तनीरोधावाकाशश्चेतिभेदतः॥अवस्तुभावमात्रंतन्निरूपाख्यमितिश्रुतं॥६६॥प्रतिसंख्यातुभावानांनाशस्याद्बु-
द्धिपूर्वकः॥विपरीतोनिरोधस्यात्प्रतिसंख्यानिरोधकः॥६७॥तथैवावरणाभावमात्रमाकाशमुच्यते॥प्रत्याचष्ट
इदानींतन्निरोधद्वयमप्यथ॥६८॥प्रतिसंख्यातनीरोधद्वयाप्राप्तिरसंभवः॥अवच्छेदात्तदेतौहिस्यातांसंता
नगोचरौ॥६९॥किंभावगोचरावेतौनैवसंतानगोचरौ॥संतानेष्वपिसर्वेषुकिलसंतानिनापुनः॥७०॥तद्धेतु
फलभावेनसंतानस्यतथैवहि॥विच्छेदविरहान्नापिस्यातांतौभावगोचरौ॥७१॥निरन्वयोहिभावानांनिंपाख्यो रु
विनाशकः॥अवस्थास्वपिसर्वासुप्रत्यभिज्ञाबलेनतु॥७२॥अन्वयच्छेदभावेनतस्मात्तत्परिकल्पितं॥नोपपन्ने
विरोधस्यद्वयमित्यवधार्यतां॥७३॥यश्चाविद्याविरोधस्यात्प्रतिसंख्यानिरोधके॥अंतःपातिसमीचीनज्ञाना-
त्परिकरैःसह॥७४॥स्वयमेवयथाचाचाहानिनिर्हेतुकादिके॥ज्ञानोपदेशानर्थक्यमंतेचोभयथापिच॥७५॥दो ३४
षादेत्तद्दर्शनंतुसर्वंतदसमंजसं॥आकाशेचाविशेषाच्चनिरूपाख्यत्वमेवन॥७६॥अविशेषात्तत्प्रतीतेस्तावद्वे-

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

देप्रमाणतः॥आकाशवत्सर्वगतश्च नित्यइतिवाक्यतः॥७७॥योस्मिन्वस्तुप्रसिद्धंहिप्रतिपन्नान्जनान्प्रति॥श
ब्दानुमेयतावाच्यागंधादीनांतथापुनः॥७८॥पृथ्व्याद्याश्रयतायाश्च सर्वत्रापिचदर्शनात्॥अपिचावरणाभा
वमात्रमाकाशमिच्छतः॥७९॥तार्क्ष्येपततिचैतस्मिन्सत्वादावरणस्यतु॥पिपत्सुतोन्यतार्क्ष्यस्यपतिष्यतिच-
तत्रचेत्॥८०॥येनवावरणाभावोविशेष्येतततोप्यथ॥आकाशंवस्तुभूतंस्यान्नैवभूच्याभावमात्रकं॥८१॥अ
नुस्मृतेश्चायुक्तंवैवैनाशिकमतंततः॥वैनाशिकाःक्षणिकतांवदेयुस्सर्ववस्तुनः॥८२॥अभ्युपेयात्क्षणिकतामु-
पलब्धुरपिस्वयं॥अनुस्मृतेर्नचैवंस्यादित्यस्यार्थोविचार्यते॥८३॥अनुभूतमनुत्पन्नेस्मरणंस्यादनुस्मृतिः॥सा
चसंभातीत्थंचेदनुभूत्येककर्तृका॥८४॥नैवमन्यानुभूतार्थेस्मृतिरन्यस्यसंभवेत्॥अप्येवंदर्शनस्मृत्योरेक
स्मिन्कर्तरिस्फुटम्॥८५॥प्रत्यक्षप्रत्यभिज्ञानंप्रसिद्धंसर्वलोकतः॥अहमद्राक्षमेवैतंभिन्नःकर्तातयोर्यदि॥८६॥
भवेत्तदासावद्राक्षीन्नैवंप्रत्यतिकश्चन॥नैवासतोह्यदृष्टत्वाद्वैनाशिकमिदंमतं॥८७॥अनंगीकुर्वतांभावकार्यंच
स्थिरकारणं॥भावोत्पत्तिरभावंचतत्कार्यंदर्शयत्यपि॥८८॥भावोत्पत्तिमभावश्चानुरूपमद्यभवेन्नहि॥प्रादु
र्भावस्तथानष्टात्बीजात्सचकिलांकुरः॥८९॥घटोविनष्टान्मृत्पिंडात्कादस्यादविशेषतः॥यदिचेत्सर्वतः।
सर्वमुत्पद्येतेतितेऽदुः॥९०॥तत्रेदमुच्यतेनस्यादभावाद्भावसंभवः॥भावोत्पत्तिर्यद्यभावात्तदाभावाविशेष
तः॥९१॥तत्कारणविशेषस्यकल्पनाव्यर्थतामियात्॥बीजादीनांविनष्टानांविनष्टानांमृदांतथा॥९२॥शशशृंगादि

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि० कानांच विशेषो नास्त्यभावतः ॥ बीजादेवांकुरोत्पत्तिः शशशृंगात्कुतो नहि ॥ ९३ ॥ नीलादिरुत्पलादीनामिवाभावो सा०
३५ विशिष्यते ॥ विशेषवत्त्वादेवाभावस्य भावत्वमुच्यते ॥ ९४ ॥ उत्पलादिवदेवं चेदभावाद्भावसंभवे ॥ अभावान्वित
मेवस्यात्कार्यमेवमृदन्विताः ॥ ९५ ॥ शरावाद्या हि दृश्यंते यत्त्वयोक्तं न दृश्यते ॥ यच्च नानुपमृद्यात्र प्रादुर्भावादिती
रितं ॥ ९६ ॥ तद्रुरुक्तं सुवर्णे च स्वेषामेव तथा पुनः ॥ प्रत्यभिज्ञायमानानां सुवर्णानां हि दृश्यते ॥ ९७ ॥ रुचकादौ कार
णत्वमपि चैवांकुरादिषु ॥ उपादानेन बीजाद्या अनुस्यूतांशुकाः पुनः ॥ ९८ ॥ तस्मादनुपरं नायमभावाद्भावसंभवः ॥ द्वा
भावोत्पत्तिमभावादभ्युपगम्येत यद्यपि ॥ ९९ ॥ एवं चानीहमानानामौदासीन्येन वै नृणाम् ॥ सुलभत्वादभावस्य सि
ध्येदभिमतं फलं ॥ ४०० ॥ क्षेत्रकर्मण्ययत्नस्य कृषिकस्य सदा भवेत् ॥ समृद्धा सस्यसंपत्तिर्न समीहेत कश्चन ॥ १ ॥ त
थैवालयमागच्छेत्तदास्याद्युक्तमीरितं ॥ स्वर्गापवर्गयोस्तस्मान्न युक्तं तावकं मतं ॥ २ ॥ अ विज्ञानवादी बौद्धश्चेदानीं
प्रत्यवतिष्ठते ॥ केशांचिच्च विनेयानामर्थानां बाह्यवस्तुनि ॥ ३ ॥ आलक्ष्याभिनिवेशं तदनुरोधेन केवलं ॥ बाह्यार्थप्र
क्रियेयं तु रचिता तेन वै पुनः ॥ ४ ॥ नाभिप्रेता हि सुगतैः विज्ञानस्कंधवादिभिः ॥ तस्मिन्विज्ञानवादे च बुध्यारूढे
न केवलं ॥ ५ ॥ रूपेणांतस्थ एवात्र प्रमाणफलमित्यपि ॥ प्रमेयं चेति सर्वोपि व्यवहारोपियुज्यते ॥ ६ ॥ तथासत्यपि
बाह्यर्थे बुध्यारोहणमंतरा ॥ मानादिव्यवहारस्यासंभवादिति तत्कथं ॥ ७ ॥ अंतस्थो व्यवहारस्तु न बाह्योर्थ इतीरि ३५
तं ॥ अर्थोवगम्यमानस्तु बाह्यः किं परमाणवः ॥ ८ ॥ संबाध्यास्तत्समूहा वा नतावत्परमाणवः ॥ ते स्तंभादिप्रकृतयः

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

परिच्छेद्याभवंतिहि ॥ ९ ॥ परमाण्ववभासाभिज्ञानानुदयतस्तथा ॥ नतत्समूहास्तेभाद्याः परमाणुभ्यएवतु ॥ ४१० ॥ ः
अन्येतानन्यभावाच्चदुर्निरूपतयात्तथा ॥ प्रत्याचक्षीतजात्यादीन्तथानुभवमात्रतः ॥ ११ ॥ साधारणात्मज्ञानस्य
विषयेविषयेचयः ॥ पक्षपातइदंस्तंभज्ञानंकुड्यमिदंत्विति ॥ १२ ॥ घटज्ञानंपटज्ञानमित्येवंरूपतोबहु ॥ नविशे-
षोज्ञानगतंनांतरेनोपपद्यते ॥ १३ ॥ एवंविषयसारूप्यंवाच्यंज्ञानस्यवेपुनः ॥ तस्मिन्नेशक्तेचापिज्ञानेनविषया
कृतेः ॥ १४ ॥ परिणामेविनानोभौप्रमाणस्ययतःपुनः ॥ प्रवृत्तिंचाप्रवृत्तिंचपुरस्कृत्यैवतावुभौ ॥ १५ ॥ नसंभवासंभ-
वौचपुरस्कृत्यैवकेवले ॥ प्रवृत्तिरप्रवृत्तिर्वानप्रमाणस्ययुज्यते ॥ १६ ॥ प्रत्यक्षादिष्वन्यतमप्रमाणेनोपलभ्यते ॥ सं
भवत्येवतद्यत्तुप्रमाणेननकेनवा ॥ १७ ॥ उपलभ्येततन्नैवतत्रसंभवतीहतु ॥ लभ्यमानोहिबाह्योर्थःसर्वैरेवप्रमा-
णकैः ॥ १८ ॥ विकल्पैर्व्यतिरेकाद्यैःकथंनेत्यववर्णयेत् ॥ नैवंविषयसारूप्याल्लब्धेविषयनाशने ॥ १९ ॥ अस्विकृतेच
विषयेपुनर्विषयरूपितं ॥ सारूप्यंनोपलभ्येतबहिर्विषयलम्भितः ॥ ४२० ॥ स्वप्नप्रत्ययवज्जाग्रदवस्थाप्रत्ययाअपि ॥
त्यु विनैषबाह्यंयुज्येरन्नैत्रत्प्रोच्यतेमया ॥ २१ ॥ स्वप्नप्रत्ययवज्जाग्रत्प्रत्ययःयानभवंतिहि ॥ वैधर्म्योक्तंच्चवैधर्म्यंबाधाबा
धावित्तीरितौ ॥ २२ ॥ बाध्यतेस्वप्नलब्धोर्थःप्रतिबुद्धोवदेदिति ॥ मिथ्यामयोपलब्धोहिमहाजनसमागमः ॥ २३ ॥ ः
निद्राग्लानंममनस्तेनैषाभ्रांतिरित्यथ ॥ एवंयथायथंबाधोमायादिष्वपिदृश्यते ॥ २४ ॥ नैवंजाग्रल्लब्धवस्तुस्याद
वस्थानुबाधितं ॥ अबाधितत्वमास्तेयंतज्जाग्रत्प्रत्ययस्यतु ॥ ४२५ ॥ तेनस्वप्नप्रत्ययस्यान्मिथ्याबाधितइत्यसौ ॥

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

नै

क्रि० अथजाग्रत्प्रत्ययस्याबाध्यत्वेबाधकोनहि ॥२६॥ स्वाप्नानांप्रत्ययानांस्याबाध्यंबाधनंयतः ॥ नस्वप्नप्रत्ययो- सा०
३६ मिथ्याततःस्वप्नवदित्यसौ ॥२७॥ दृष्टांतःसाध्यविकलस्तद्बाधाबाधलक्षणं ॥ वैधर्म्येनस्वप्नवच्चजाग्रतःप्रत्ययस्य
तु ॥२८॥ भवेन्निर्विषयत्वाध्यवसानमितिनिश्चयः ॥ यदप्युक्तंविनाप्यर्थंज्ञानवैचित्र्यमद्भुतं ॥२९॥ वासनानांच
वैचित्र्यमितिप्रत्युच्यतेमया ॥ वासनानांनभावोपित्वत्पक्षेनुपलब्धितः ॥४३०॥ अपिचार्थोपलब्ध्यर्थंबाह्यार्था
नांभवेतिताः ॥ नामरूपावासनख्याःप्रत्यर्थंभाषितास्त्वया ॥३१॥ अर्थेष्वलभ्यमानेषुकिंनिमित्तास्तुतद्वद ॥ अ-
नादित्वेप्यंधपरंपरान्यायेनदुर्वहा ॥३२॥ वासनानामसंस्कारविशेषास्तावदाश्रयं ॥ अंतरेणावकल्पंतएवलोकेषु
दर्शनात् ॥३३॥ नसाधनाश्रयःकश्चित्तेत्वचास्तिप्रमाणतः ॥ अतोनानुपलब्धेश्चक्षणिकत्वाच्चनैवतत् ॥३४॥ यद
स्यालयविज्ञानेपरेणपरिकल्पिते ॥ यद्वासनाश्रयत्वेनक्षणिकत्वपरिग्रहात् ॥३५॥ अनवस्थितरूपंततप्रवृत्तिज्ञा
नवत्स्वयं ॥ नवासनाधिकरणंतावद्भवितुमर्हति ॥३६॥ नकालत्रयसंबन्धिन्येकस्मिन्नसतिस्फुटं ॥ देशकालनिमि
त्तादिसापेक्षावासनातुया ॥३७॥ तदधीनस्मृतेस्तस्याःप्रतिसंधानपूर्वकः ॥ व्यवहारस्संभवतिस्थिरत्वेचालयस्यतु ॥
॥३८॥ क्षणभंगप्रतिज्ञायाःग्लानिरापततिध्रुवं ॥ अपिविज्ञानवादेपिक्षणिकत्वपरिग्रहात् ॥३९॥ यच्चबाह्यार्थवादे
षुक्षिणिकत्वनिबंधनं ॥ दूषणंभावितंतच्चेदुत्तरोत्पादनेपिच ॥४४०॥ पूर्वक्षणनिरोधादीत्येवमादिकमत्रच ॥ अ ३६
नुसंधेयमेतस्मादेतौपक्षौनिराकृतौ ॥४१॥ बाह्यार्थवादोविज्ञानवादिपक्षश्चतावुभौ ॥ सर्वधानुपपत्येश्चतन्नैकस्मिन्

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

संभवात् ॥४२॥ इदानीं तु क्षपणकमतं दूरे निरस्यते ॥ स प्रत्तेषां पदार्था जीवाजीवास्रवसंवराः ॥४३॥ बंधश्च निर्ज
रा मोक्षः संक्षेपाद्वौ पदार्थकौ ॥ जीवाजीवौ तयोरंतरभावात्तेषामितीर्यते ॥४४॥ तयोः प्रपंचमपरमिममौक्षते च च
ते ॥ पंचास्तिकायास्तेष्वाद्याः प्रोक्तो जीवास्तिकायकः ॥४५॥ तत्पुद्गलास्तिकायश्च ततो धर्मास्तिकायकः ॥ एतानांत
रभेदेन बहुशः परिकल्पितान् ॥४६॥ जगुर्बोधात्मनो जीवो जडवर्गस्त्वजीवकः ॥ इंद्रियाणां प्रवृत्तिस्यादास्रवस्संप
रत्वयं ॥४७॥ शमादिरूपायावास्यात्प्रवृत्तिस्त्वथ निर्जरा ॥ तस्मान्मारोहणादिस्यात्बंधोष्टविधकर्मतत् ॥४८॥ चतु
र्विधं घातिकर्माद्यं ज्ञानावर्णीयकं ॥ दर्शनावर्णीयं च मोहनीयं त्रितीयकं ॥४९॥ अंतरालिकमेवं स्यादथाघाति चतुर्वि
धं ॥ वेदनीयं नामिकं च गोत्रीयायुष्कमित्युभे ॥५०॥ तत्र सम्यग्ज्ञानतस्यान्नमोक्ष इतिपर्ययः ॥ तत्तज्ज्ञानावरणी
यं स्यात्कर्म चार्हत्तदर्शनात् ॥५१॥ अभ्यासान्नभवेन्मोक्षो दर्शनावरणीयकं ॥ त्रितीयं मोहनीयं तु विशेषानवधा
रणं ॥५२॥ बहुशः प्रतिषिद्धेषु मोक्षमार्गेष्वितीरिते ॥ मोक्षमार्गप्रवृत्तानामंतरायकरं विदुः ॥५३॥ विज्ञाने यत्तुरी
यं तदंतरालिकसंज्ञितं ॥ श्रेयो हंत्वतयेतानि घातिकर्माण्यरीरटन् ॥५४॥ अथ चाघातिकर्माणि वेदनीयमथोच्यते
शुक्लपुद्गलपाकेषु हेतुर्बन्धोपि नैव हि ॥ श्रेयोनिरोधि यस्मात्तत्तत्त्वज्ञानादिघातकं ॥ यच्छुक्लपुद्गलारंभवेदनीयानुरो
धितत् ॥५६॥ नामिकं कर्म चाख्यातं तत्कर्मारभते पुनः ॥ तच्छुक्लपुद्गलस्याद्यावस्था कललबुद्बुदं ॥५७॥ अव्याकृतं त
तोप्याद्यं शक्तिरूपेण संस्थितं ॥ गोत्रीयमथ चायुष्कमायुष्कायति वैनृणां ॥५८॥ सम्यगुत्पादनद्वारा सत्तां कथयती

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

बध्नातिपुरुषंचेतिबंधकर्माष्टकंचतत् ॥ गतसर्वक्लेशराजा सा०
क्रि० तितत् ॥ अघातिकर्मणीशुक्लपुद्गलाश्रयतायतः ॥ ५९ ॥ मोक्षइत्येवमपरेतूर्ध्वंगमनशालि
३७ तवासनस्यैवचात्मनः ॥ ४६० ॥ सम्यक्सुखैकतानस्यचोपरिष्टादवस्थितिः ॥ एवमन्यत्र
नः ॥ ६१ ॥ जीवस्यबंधविरहात्तयदूर्ध्वंगच्छतीतिसः ॥ अस्तीतिकायतेयस्माज्जीवएवास्तिकायकः ॥ ६२ ॥ अन्योप्रसिद्धोविज्ञेयोपूर्यतेगलती
जीवास्तिकायस्तुत्रिविधस्मृतः ॥ बद्धोमुक्तोनित्यसिद्धआर्हतस्तुतृतीयकः ॥ ६३ ॥ पृथिव्यादीनिच॰
तिच ॥ पुद्गलेवस्तुपचितेतथैवापचितेचतत् ॥ ६४ ॥ स्यात्पुद्गलास्तिकायश्चषोढाभेदसमन्वितः ॥ स्यादधर्मास्तिकायस्तुस्थितिहेतुरिती
त्वारिस्थावरंजंगमंत्विति ॥ ६५ ॥ धर्मास्तिकायोविज्ञेयःप्रकृतेरानुकूल्यवान् ॥ स्यादधर्मास्तिकायस्तुस्थितिहेतुरिती
रितः ॥ ६६ ॥ द्विधाकाशास्तिकायश्चलोकाकाशस्तथादिमः ॥ अन्यस्त्वलोकाकाशस्स्याद्दुपर्युपरिवर्तिनां ॥ ६७ ॥ अंतर्व-
तींतुलोकानांलोकाकाशइतीर्यते ॥ मोक्षस्थानंतदुपरित्वलोकाकाशउच्यते ॥ ६८ ॥ सर्वत्रसप्तभंगीनांन्यायंत्तमवतारय
न् ॥ निपांतोनेकांतभासीतिङंतप्रतिरूपकः ॥ ६९ ॥ यदिवस्त्वस्त्येवचेन्येकांततःसर्वथासदा ॥ सर्वत्रसर्वात्मनास्त्येवेति
चैतदसंगतं ॥ ७० ॥ तस्यचेप्साजिहासाभ्यांकानिचित्क्वचिदेवच ॥ सत्वेप्रेक्षापतांहानोपादानेकल्पितेइति ॥ ७१ ॥ त
मेककंसप्तभंगीनयंदूषयतिस्वयं ॥ असंभवाच्चनेकस्मिन्निति सूत्रेणसूत्रकृत् ॥ ७२ ॥ सत्वासत्वादिधर्माणामन्योन्या
भावरूपिणां ॥ एकस्मिन्धर्मिणिसमावेशःशीतोष्णवन्निहि ॥ ७३ ॥ एवंचात्माकार्त्स्न्येमितिनदेहपरिमाणता ॥ पर्या ३७
येणाविरोधोपिविकारादिभ्यएवन ॥ ७४ ॥ अंत्यमोक्षावस्थितस्यपरिमाणस्यनित्यता ॥ आद्यस्यमद्यमस्यापिपरिमा

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

णस्यनित्यता ॥७५॥ शरीरपरिमाणस्यवक्तृव्याचैकरूपता ॥ अविशेषात्प्रसज्येततस्मादेवंनशक्यते ॥७६॥ अथवा-
त्यस्यमोक्षेचपरिमाणस्यतुस्थिते ॥ अवस्थयोः पूर्वयोस्तुजीवस्यात्तत्प्रमाणकः ॥७७॥ ततोविशेषतोणुर्वामहान्वा
जीवभावतः ॥ नदेहपरिमाणस्यतस्मान्मतमसंगतं ॥७८॥ असामंजस्यतः पत्युरधिष्ठातेश्वरस्त्विति ॥ निमित्तमा-
त्रवादस्तदश्रौतत्वान्निषिध्यते ॥७९॥ अश्रौतेश्वरवादश्चनानारूपेणकल्पितः ॥ पुरुषस्यप्रधानस्याप्यधिष्ठाताचकेव
ले ॥८०॥ निमित्तकारणंयोगसांख्याद्याजगुरीश्वरं ॥ माहेश्वरास्तुमन्यंतेपदार्थांश्चतेपुनः ॥८१॥ कार्यंचकारणंयो
गोविधिर्दुःखांतइत्यपि ॥ पशुपाशविमोक्षायपत्यादिष्टाइमेइति ॥८२॥ ईश्वरस्यात्पशुपतिःनिमित्तकारणंत्विति
माहेश्वरास्तुचत्वारःशैवाःपाशुपतास्तथा ॥८३॥ कारुसिद्धांतिनःकेचित्तथाकापालिकाःपरे ॥ महेश्वरप्रणीतागमा
नुसारतयाचते ॥८४॥ नाम्नामाहेश्वराःप्रोक्तास्तत्रकारणमीश्वरः ॥ कार्यंप्रधानंयोगस्तुमहदादिप्रकीर्तितं ॥८५॥ ओं
कारज्ञानधृत्यादिविधिस्त्रिषवणंपुनः ॥ गूढचर्यावसानंचदुःखांतोमोक्षइत्यपि ॥८६॥ आत्मानःपशवस्तेषांपाशोबं
धःप्रकीर्तितः ॥ दुःखांतस्तद्विमोक्षस्यादितिवैशेषिकाःपुनः ॥८७॥ स्वप्रक्रियानुसारेणनिमित्तत्वीश्वरस्त्विति ॥ अधि
ष्ठातुकुलालादेःनिमित्तत्वंघटादिषु ॥८८॥ उपादानत्वमपिनतद्वत्कार्यंप्रतीश्वरः ॥ तत्रेदंप्रतिभातीत्थंकिंकेवलनि
मित्तता ॥८९॥ श्रुतेरुतानुमानादेर्नोद्यस्तूभयवर्णनात् ॥ निमित्तोपादानतेत्तीचोपादानत्वमित्यपि ॥९०॥ वेदेष्वस-
कृदुक्तत्वादनुमानमपीहन ॥ अनुमानात्कल्प्यमानईशोदृष्ट्यानुसारतः ॥९१॥ कल्पनीयस्तुतश्चात्रकुलालवदपीशितुः

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि० रागादिदोषः सज्येतवैषम्यंनिर्घृणादिकं ॥९२॥ सार्थकत्वादनीशत्वप्रसक्तेश्चेश्वरस्यच ॥ स्यात्पूरुषविशेषत्वोपग सा०
३८ मात्पुरुषस्यच ॥९३॥ औदासीन्याभ्युपगमादसामंजस्यमापतेत् ॥ अधिष्ठानासंगतेश्चैवंकरणवद्यदि ॥९४॥
नभोगादेः प्रसक्तत्वादंतरत्वंप्रसज्यते ॥ स्यादसर्वज्ञतावापिपरिच्छेदोनवातथा ॥९५॥ उत्पत्त्यसंभवात्पांचरात्रम
तमसंगतं ॥ भगवान्वासुदेवस्स्यात्तज्ज्ञानरूपोनिरंजनः ॥९६॥ परमार्थेचतत्तत्वंस्वचतुर्धाविभज्यच ॥ आत्मानंप्र-
न तितिष्ठंवासुदेवव्यूहरूपतः ॥९७॥ संकर्षणव्यूहरूपः प्रद्युम्नव्यूहरूपकः ॥ अनिरुद्धव्यूहरूपीवासुदेवः परात्मनाम् ॥
॥९८॥ संकर्षणोजीवनामप्रद्युम्नोमनउच्यते ॥ अहंकारोनिरुद्धस्स्यात्तेषांप्रकृतिरुच्यते ॥९९॥ वासुदेवस्तदितरेका
र्यमित्यभिधीयते ॥ संकर्षणोवासुदेवात्प्रद्युम्नस्संकर्षणात्मनः ॥५००॥ प्रद्युम्नादनिरुद्धश्चजातइत्यभिधायच ॥ भ
गवंतंमहात्मानमिज्ययाधिगमेनच ॥१॥ स्वाध्याययोगैरिष्ट्वातंक्षीणक्लेशस्तुयोजनः ॥ भगवंतंप्रपद्येतेत्यादितत्रोच्य
तेमया ॥२॥ उत्पत्त्यसंभवाद्दोषादनित्यत्वादिसंभवः ॥ नैवास्यभगवत्प्राप्तिः मोक्षस्याकारणस्यतत् ॥३॥ कार्यप्राप्तौ-
चविलयप्रसंगात्तदसंभवः ॥ कर्तुस्संकर्षणाज्जीवात्प्रद्युम्नःकरणंमनः ॥४॥ उत्पद्यतइतिह्यतदुक्तंनात्पत्यसंभवात् ॥
विज्ञानादिषुवासत्सुस्यादेवोत्पत्तिसंभवः ॥५॥ अथविप्रतिषेधाच्चक्वचिद्गुणगणत्वकं ॥ ज्ञानैश्वर्यादिचगुणाः क्वचिदा
त्मानयेनते ॥६॥ संकर्षणादयोजीवाः वासुदेवः क्वचित्तथा ॥ वेदनिंदादर्शनाच्चपांचरात्रमसंगतं ॥७॥ सांख्यादिपांचरा ३८
त्रांतानिरस्ताबहुयुक्तिभिः ॥ यावत्परमतंनैवनिराकुर्यात्स्वयुक्तिभिः ॥८॥ अप्रतिष्ठितमेवस्यादितिन्यायात्स्वकंमतं ॥

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

तस्माद्धृदयदेशेतुलिंगंधार्यंमुमुक्षुभिः॥९॥इतिसिद्धेप्रमाणेश्वतथैवबहुयुक्तिभिः॥उक्ताविप्रतिषेधेनपरपक्षान
पेक्षता॥१०॥तद्वच्छ्रुतेःसामान्योन्यनिरोधाचनपेक्षता॥स्यात्तन्माभूदितिपरःप्रपंचःप्रसरत्यसौ॥११॥आकाश
स्यसमुत्पत्तिरस्तिवानेतिसंशये॥वियन्नोत्पद्यतेकस्माच्छांदोग्येतुतदश्रुतेः॥१२॥तैत्तिरीयोपनिषदिवियदुत्पत्ति
रस्तितु॥श्रुतिर्वियत्समुत्पत्तेगौणीचोत्पत्त्यसंभवात्॥१३॥यस्यहिप्रागभावोस्तितस्योत्पत्तिर्यथाघटे॥नचाकाशःप्रा
गभावस्तस्माद्गौणीकिलश्रुति॥१४॥तस्माच्चामृतमित्यादिश्रवणान्नित्यमेवहि॥आकाशवत्सर्वगतोनित्यइत्याद्यसंग
तेः॥१५॥स्याच्चैकस्यब्रह्मशब्दवन्मुख्यत्वेचगोणता॥नप्रतिज्ञाहानिरत्रतथैवाव्यतिरेकतः॥१६॥शब्देभ्योघटसत्ताया
मृत्सत्ताव्यतिरेकतः॥मृदज्ञानेघटज्ञानेनतद्ब्रह्माव्यतिरेकतः॥१७॥ब्रह्मसत्ताव्यतीरेकात्सत्तायावियतस्तथा॥ब्रह्मज्ञाना
द्वियज्ज्ञानंसुखेनैवोपपद्यते॥१८॥अथयावद्विकारंतुविभागोलोकवत्तथा॥एतेनमातरिश्वापिव्याख्यातप्रायएवहि॥
॥१९॥वायुश्चांतरिक्षमितिह्यमृतत्वंविधीयते॥वियतःप्रागभावस्याभावान्ननिरसंगता॥२०॥वायोस्तुप्रागभावस्य
सत्वात्तन्नित्यताकथं॥तदुत्पत्तिःश्रुतिर्गौणीत्यत्रैवप्रतिपाद्यते॥२१॥वायोःप्रागेवसत्वावधारणेनामृतश्रुतेः॥उत्पत्य-
संभवात्तस्याःश्रुतेर्गौणत्वमेवहि॥२२॥वायोरग्निरितिश्रुत्यात्तेजस्यान्मातरिश्वनः॥तेजस्सकाशादापस्तुस्याद्दभ्यः।
पृथिवीस्वयं॥२३॥अधिकारात्तथाकृष्णरूपाच्छब्दांतरान्मही॥इतिप्राप्तेसएवेशःकारणंजगतांस्वयं॥२४॥नवाग्
वादस्तुतदभिध्यानादेवसईश्वरः॥तल्लिंगात्सोकामयतबहुस्यामितिकामनात्॥२५॥अप्तेजसोर्जडत्वेनचेक्षणंजगदी

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि० शितुः॥ विपर्ययेणचोत्पत्तिक्रमोतउपपद्यते ॥२६॥ तथाक्षरात्संभवतीह विश्वमितिवर्णयन् ॥ तेनक्रमेणजायंतइ॰ सा०
३९ त्याहाअथर्वणीश्रुतिः॥२७॥ तपसाचीयतेब्रह्मततोन्नमभिजायते ॥ अन्नात्प्राणोमनःसत्यंलोकाःकर्मसुचामृतम्॥
॥२८॥ यःसर्वज्ञःसर्वविद्यस्यज्ञानमयंतपः॥ तस्मादेतद्ब्रह्मनामरूपमन्नंचजायते ॥२९॥ पृथ्वींजलंचांतरेणविज्ञा
नमनसीक्रमात्॥ अन्नात्प्राणोमनःसत्यमितितल्लिंगतश्चरेत् ॥३०॥ उत्तरीतिर्बोविशेषादन्नानंतर्यमत्रच ॥ पौर्वापर्यंश्रु
तेश्चैवमन्नात्प्राणस्ततोमनः॥३१॥ मनसःसत्यतायास्तुश्रवदितिवैस्थितिः॥ नचोत्पत्तिश्वरूपेणविज्ञानमनसोस्तयोः॥
॥३२॥ अनादितायावाच्यत्वात्त्वचराचररूपिणः॥ देहस्यान्नविकारत्वादन्नानंतर्यवर्णनात् ॥३३॥ तथाचराचरोत्पत्तिर्व्यपा
श्रयउदीरितः॥ विज्ञानमनसोर्जन्मभाक्तंतद्भावभावनात् ॥३४॥ सत्यांदेहसमुत्पत्तौविज्ञानमनसोर्जनेः॥ व्यपदेशात्त-
तश्चात्रस्वरूपेणतयोर्जनेः॥३५॥ विरहान्नचभूतानांमुत्पत्तिक्रमभंजनं ॥ किंजीवस्यसमुत्पत्तिरुत नास्तीतिसंशयः॥
॥३६॥ यथावाग्नेर्विष्फुलिंगाव्युच्चरंतीत्युपक्रमे॥ सर्वएवेतिकिलात्मानोव्युच्चरंतीतिचश्रुतेः॥३७॥ उत्पद्यतइतिप्राप्तेनजी
वस्यसमुद्भवः॥ अनुक्तत्वात्प्रकरणेच्छांदोग्योपनिषद्गुणैः॥३८॥ नजीवोम्रियतेनित्यइत्यादिश्रुतिदर्शनात्॥ यथावन्हे
र्विष्फुलिंगानिर्गच्छंतितथैवच॥३९॥ जीवानांनिर्गमस्तस्मान्नविरोधोस्तिकश्चन ॥ जीवस्वरूपःकिंवात्माजातिःकिंवे
तिसंशयः॥४०॥ विज्ञानघनइत्याद्यैःप्राप्ताज्ञानस्वरूपता ॥ ज्ञात्वैवह्यधियोवेदेष्वजिघ्राणीतिवाक्यत ॥४१॥ द्रष्टाश्रोता ३९
तयामंताबोद्धेत्यादिश्रुतीरणात् ॥ गुणस्यगुणिनोभेदाभिप्रायोदाहृताश्रुतिः॥४२॥ किंजीवोणुपरीमाणोमध्यमोवाम

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

हान्किमु ॥ मध्यमंतुपरामाणंनिरस्तंचार्हतक्रमे ॥४३॥ उत्क्रांतिगत्यागतीनांश्रवणादणुरेवसः ॥ उत्क्रांतिश्चावयवतोन
विभोरूपपद्यते ॥४४॥ लोकांतरायगमनंपुनरागमनंत्तथा ॥ इत्यागतीस्वात्मनैवनभूतैःकरणैर्वृतः ॥४५॥ सवाएषम
हान्वाक्येनाणुरात्मेतिचेरणात् ॥ परमात्माधिकारात्तच्छ्रुतेर्जीवोणुरेवहि ॥४६॥ एषोणुरात्मावाक्येनतथोन्मानेनचाप्य
णुः ॥ वालाग्रशतभागस्यशतधाकल्पितस्यच ॥४७॥ भागोजीवःसविज्ञेयःसचानंत्यायकल्पते ॥ आराग्रमात्रोह्यवरो
पिदृष्टइतिवर्णनात् ॥४८॥ नन्वणुत्वेतुजीवस्यसर्वदेहगताकथं ॥ वेदनामुपलभ्येततत्रेदंपठितेखलु ॥४९॥ अवरोध
श्चंदनवच्चैतन्यगुणयोगतः ॥ अवस्थितेपिवैशेष्यादितिचेन्नतथाभवेत् ॥५०॥ हृदयेह्यभ्युपगमान्नविरोधोस्तिकश्च
न ॥ गुणाद्वालोकवच्चात्रचैतन्यगुणयोगतः ॥५१॥ मणिप्रदीपादिकानांप्रभाव्याप्तायथाखिले ॥ चैतन्यव्याप्तितःकृत्स्नदे
हव्याप्तित्वसंगतिः ॥५२॥ कथंगुणस्तुगुणिनमंतरावर्ततेयथा ॥ नपटव्यतिरेकेणशुक्लोवर्ततेवैगुणः ॥५३॥ प्रभादीपगुणे
नेयंतेजोन्यद्विरलांगकं ॥ व्यतिरेकोगंधवत्तुचाप्राप्तकुसुमादिषु ॥५४॥ चैतन्यस्यगुणस्यात्रव्यतिरेकस्तथाप्यणोः ॥ ननुगं- मा
धस्याश्रयेणसहविश्लेषएवचेत् ॥५५॥ अपक्षयःप्रसज्येततदातुकुसुमादिषु ॥ हीयेतचगुरुत्वाद्यैस्तन्नैवपरिदृ-
श्यते ॥५६॥ नचाल्पत्वाद्विशिष्टानांविशेषोनोपलभ्यते ॥ स्फुटंगंधोपलब्धिस्यात्तर्हिलोकेप्रतीयते ॥५७॥ गंधद्रव्यं
यदाघ्रातमितिगंधोमयेतिन ॥ तथाह्याद्यंतथाज्ञानंगुणानांव्यतिरेकता ॥५८॥ तथाचदर्शयत्येवमालोमभ्यइतिश्रु-
तिः ॥ चैतन्यस्यगुणत्वेनतस्यैवात्मस्वरूपतः ॥५९॥ चैतन्यस्यात्रव्याप्तित्वेजीवव्याप्तित्वमत्रचेत् ॥ पृथक्त्वोपदेशाश्च-

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

प्रज्ञयेत्यादिवाक्यतः॥५६०॥विज्ञानशब्दवाच्यत्वमितिसद्गुणसारतः॥विज्ञानव्यपदेशस्यात्प्राज्ञवल्लवणाब्धिवत्॥ सा०
क्रि० प्रज्ञयेत्यादिवाक्यतः॥५६०॥विज्ञानशब्दवाच्यत्वमितिसद्गुणसारतः॥विज्ञानव्यपदेशस्यात्प्राज्ञवल्लवणाब्धिवत्॥
४० ॥६१॥तद्यावदात्मभावित्वाच्चादोषस्तस्यदर्शणात्॥गोत्ववाचकगोशब्दादतद्वोव्यक्तिवर्णनात्॥६२॥ज्ञानाभावात्सुषु
प्त्यादौयावदात्मत्वमत्रण॥सतःपुंस्त्वादिवत्तस्याभिव्यक्तिरुपपद्यते॥६३॥विद्यमानेयथापुंस्त्वंबाल्यादौकारणात्मना
यौवनेचाविर्भवेत्तत्सुषुप्तौकारणात्मना॥६४॥जाग्रदादावभिव्यक्तमतोदोषोनकश्चन॥ज्ञातृत्वेचतथाणुत्वेसम्यगे-
वप्रसादिते॥६५॥सुषुप्तेर्ज्ञप्तिरूपत्वेविमुक्तेवाधउच्यते॥नित्योपलब्धिरथवानुपलम्भःप्रसज्यते॥६६॥निर्मोन्यतर- य
स्याथप्रसज्येतान्यथापुनः॥जीवःकर्ताथवानेतिसंशयेचसमागते॥६७॥सांख्यास्तावद्वर्णयंतिजीवःकर्तानचेतिते॥
तस्यानादेयातिशयत्तयाविरहतःकृतेः॥६८॥असंगोह्ययमित्याद्यैरसंगत्वोपवर्णनात्॥तस्मिन्निमित्तसंयोगाभाव
च्चेतिसमीरिते॥६९॥बुद्धेरेवतुकर्तृत्वमितिप्राप्तेथचोच्यते॥शास्त्रार्थवत्वात्कर्तासयजेतजुहुयादिति॥५७०॥शास्त्रे-
जीवस्यकर्तृत्वंसम्यगेवप्रतीयते॥अन्यथानर्थकंशास्त्रंस्यादेवंप्रतिपादिते॥७१॥नचानादेयातिशयतयाभावःकृते
रिति॥सुखाद्यतिशयेनात्रप्रत्यक्षेनोपलंभनात्॥७२॥अनादेयातिशयत्वस्यासिद्धेरितीरिते॥नैवंनिमित्तसंयो
गविरहःपठ्यतांत्वया॥७३॥आत्मेंद्रियमनोयुक्तंभोक्तेत्याहुर्मनीषिणः॥सम्यग्निमित्तसंयोगःश्रुत्येतिप्रतिपा
दितः॥७४॥असंगत्वश्रुतिश्चायमस्यजीवस्यजाग्रति॥स्वप्नदृष्टेनसंबंधाभावदर्शनतस्त्वियं॥७५॥नित्यसंयोगः ४०
विरहाभिप्रायेणसमीरिता॥तद्विहारोपदेशाच्चकरणोपरतौतथा॥७६॥उपादानाच्चकर्तृत्वंक्रियायांव्यपदेशतः॥

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

विज्ञानंयज्ञमित्याद्यैर्नंनुविज्ञानशब्दतः ॥७७॥ बुद्धिस्समीहितातेनकथंजीवस्यकर्तृता ॥ सूच्यतेतिचनेत्युक्तंनिर्देशो
जीवरूपिणः ॥७८॥ नबुद्धेर्जीवनिर्देशः स्यान्निर्देशविपर्ययः ॥ विज्ञानेनेत्येवमेवनिरदिक्षत्तदाश्रुतिः ॥७९॥ क्रियाया
अप्यनियमः प्रसज्येतोपलब्धिवत् ॥ यदिबुद्धिर्हिकर्त्रीस्यात्तदाशक्तिविपर्ययः ॥८०॥ आप्नुयात्कर्तृशक्तिंचत्यजेत्का
रणशक्तिकाम् ॥ आत्मनः कर्तृताभावेसमाधिविरहोभवेत् ॥८१॥ प्रकृतेः पुरुषस्यापिविवेकज्ञानतस्तदा ॥ बुद्धेरेवेच
कर्तृत्वाभावादितिसमीरिते ॥८२॥ यथाचतत्क्षोभयतः परादेवतुकर्तृता ॥ एषह्येवेत्यादिवाक्यैस्तस्यप्रेरकताश्रुता
॥८३॥ नन्वीश्वरप्रेर्यताचेन्नस्याज्जीवस्यकर्तृता ॥ बलवत्सलिलौघेनह्रीयमाणेवकर्तृता ॥८४॥ कृतप्रयत्नसापेक्षे
विहितप्रतिषिद्धयोः ॥ यजेतेतिनहंतव्यइत्येवंसमुपात्तयोः ॥८५॥ अवैयर्थ्यादिम्यइतिशास्त्रेव्यर्थंतदन्यथा ॥
यदावन्हेविष्फुलिंगईशांशोजीवईरितः ॥८६॥ सोन्वेष्टव्यादिवाक्येननानात्वव्यपदेशतः ॥ अन्यथाचापिवेदेषुचा-
त्यंताभेदउच्यते ॥८७॥ ब्रह्मदाशाब्रह्मदासाब्रह्मेमेकितवाइति ॥ हीनजात्युक्तितः सर्वंब्रह्मेतिसमुदीरिते ॥८८॥ पादो-
स्यविश्वाभूतानीत्येवंब्रह्मांशवर्णनात् ॥ ममैवांशोजीवलोकेजीवभूतस्सनातनः ॥८९॥ इत्यादिस्मृतिभिर्जीवईश्वरां
शउदाहृतः ॥ नन्वीश्वरस्यजीवानामभेदेस्वीकृतेसति ॥९०॥ जीवदुःखेनदुःखीस्यादभेदाच्चतयोर्नच ॥ परप्रकाशा-
दीवच्चस्वस्वरूपाविशेषतः ॥९१॥ स्मरंतिचव्यासमुख्याजीवदुःखान्नचेश्वरः ॥ दुःखीतिस्मृतिषुस्वैरमुत्तरेणस्फुटो-
र्थतः ॥९२॥ तत्रयः परमात्माहिसनित्योनिर्गुणस्मृतः ॥ नलिप्यतेफलैश्चापिपद्मपत्रमिवांभसा ॥९३॥ कर्मात्मात्वपरो

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

योसौमोक्षबंधेःसयुज्यते ॥ तयोरन्यःपिप्पलंस्वाद्वत्तीत्याद्येश्चतत्स्फुटम् ॥९४॥ अनुज्ञापरिहारौदेहसंबंधाद्वौयजेतेति सा॰
क्रि॰॥ योसौमोक्षबंधेःसयुज्यते ॥ नासंततेश्चसां
४१ नभस्सयेत् ॥ देहसंबंधतोज्योतिरादिवद्देशभेदतः ॥९५॥ ननुदेहोत्तरंभाविफलसांकर्यमित्यतः ॥ तेषांसर्वात्मनासर्वदेहयोगाविशेष-
कर्यंतथाविधिनिषेधयोः ॥९६॥ तेषांबहवआत्मानोभिन्नाःसर्वगताःपुनः ॥ सर्वेषांदेहसंबंधाविशेषेपितथापुनः ॥९८॥ तथादृष्टविशे-
त्तः ॥९७॥ सुखदुःखादिसांकर्यादात्माभासास्तएवहि ॥ सांकर्यमतःप्राहचादृष्टनियमादिति ॥ अ न
षाच्चततःकश्चिदेवहि ॥ सुखादियोगोनान्येषामदृष्टविरहादतः ॥९९॥ मनःसंयोगाविशेषात्सा
भिसंध्यादिकानोचप्रधानगततायदि ॥६००॥ साधारण्येपूर्ववत्स्यादात्मगत्वेपिवैपुनः ॥ सांकर्यमतःपरं ॥२॥ प्रदे
धारण्यंतुकेवलं ॥१॥ विभुत्वेप्यात्मनस्स्वस्वदेहावच्छिन्नदेशके ॥ सुखादिकंसंभवतिन ॥ तयोःस्वाभाविकोव्यक्तिभे
शादितिचेन्नांतर्भावाज्जीवास्तद्देशकाः ॥ जीवेशयोस्तुसामान्याभेदएवसमीहितः ॥३॥ एतस्माज्जायतेप्राणोमनःसर्वेन्द्रियाणिच ॥ इ
दःसर्वसमीहितः ॥ किमिन्द्रियाणिजायंतउतनेत्यत्रसंशयः ॥४॥ तदुत्पत्तिश्रुतिर्गौणी
।त्यादिश्रुतिषूत्पत्तिश्रवणादितिचेच्छृणु ॥५॥ नजायतेयथावात्मातथाप्राणेंद्रियाण्यपि ॥ तत्प्राक्छ्रुतिश्चगौण्येवप्राणावाऋषयस्त्वि
प्राणोत्पत्तेरसंभवात् ॥६॥ अनेनजीवेनेत्यादिश्रुत्यर्थस्यानुसारतः ॥ स्थितितोनैवमंतव्ये ४१
ति ॥७॥ तत्पूर्वकत्वाद्वाचश्चततःसप्तेन्द्रियाणितु ॥ गतेर्विशेषितत्वाच्चहस्तादयइमेपुनः ॥८॥ निर्गच्छंतःशरीरांतेबलादहिरिवस्फु
प्राणाःसन्त्येवचेत्यतः ॥ प्राणाश्चैतेणवःप्रोक्तास्स्थूलाश्चेन्मृतिकालतः ॥१०॥

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

टम्॥तच्छ्रेष्ठपंचवृत्तिश्चमनोवद्व्यपदिश्यते॥१०॥अणुश्चमुख्यप्राणोसौनचवायुक्रियेपृथक्॥उपदेशात्प्राण
एवब्रह्मणःश्रुतिवाक्यतः॥११॥जीवस्यकर्तृत्वेभोक्तृत्वेप्राणस्याच्चक्षुरादिवत्॥सर्वार्थत्वेनकरणंनस्वतंत्रंकदाचन
॥१२॥सहैवशिष्यतेप्राणस्तत्रैतेश्चक्षुरादिभिः॥नदोषोकरणत्वाच्चतथादर्शयतिश्रुतिः॥१३॥अधिष्ठानेज्योतिरा
देस्तथामननतःखलु॥देवताश्चेदधिष्ठात्र्यस्तासांभोक्तृत्वमत्रचेत्॥१४॥सत्यामधिष्ठातृतायांप्राणवत्करणा-
वलेः॥स्वामिनैवतुजीवेनसंबंधःश्रुतिचोदितः॥१५॥अथयत्रैतदाकाशमनुरूपाचसास्मृतिः॥तन्नित्यत्वाच्चजीव
स्यसहैवश्रुतिचोदनात्॥१६॥प्राणानांनित्यसंबन्धोजीवेनैवसमीरितः॥उत्क्रांतिप्रलयादौतदनुवृत्तेश्चदर्शनात्॥१७
तमुत्क्रामंतमित्यादिश्रुत्यातत्प्रतिपादनात्॥अग्न्यादिप्राणसंबंधअनित्यइतिवर्णितं॥१८॥अग्न्यादीनामभावे-
पिप्रलयेप्राणसत्वतः॥अग्न्यादीनांततस्तस्मादधिष्ठातृत्वमिष्यते॥१९॥श्रेष्ठात्प्राणात्तदन्यत्रपृथक्त्वव्यपदेश-
तः॥प्राणात्तत्त्वांतराण्येववागादीनितथाश्रुतिः॥२०॥एतस्माज्जायतेप्राणोमनःसर्वेन्द्रियाणिच॥व्यपदिष्टाःपृथ
क्प्राणएवमादिबहुश्रुतौ॥२१॥वागादिभ्यश्चभेदेनपृथक्प्राणश्रुतेरिति॥वैलक्षण्याच्चभेदस्यात्तस्मात्तत्त्वांतरा ग
णिहि॥२२॥नामरूपव्याकरणं,किंवाजीवैककर्तृकं॥उतेशकर्तृकंवेतिसंशयेत्रसमाते॥२३॥संज्ञामूर्त्योस्त्रक्लृप्ति
स्त्रिवृत्कुर्वतईश्वरात्॥सेयमित्यादिवाक्येस्तदुपदेशात्तथैवहि॥२४॥तत्कर्तृकरणंभौममिदमाप्यमितिस्फुटम्॥
कथंविभागमाशंक्यह्यध्यात्मेचविभाजने॥२५॥भूमौव्रीह्यादिरूपायामासाद्याध्यात्मकर्यकं॥लोहितादितथैवापां-

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि० तथैवाग्न्यादितेजसः॥२६॥ततद्वादस्तु वैशेष्यात्तत्तद्वाग विशेषतः॥स्यात्तत्तद्व्यपदेशस्तु तस्मात्सर्वं समंजसं॥२७॥ सा०
४२ लिंगादेवव्याकरणं सर्वं तन्नामरूपयोः॥त्रिवृत्करणमित्यादिलिंगादेवेति साधितं॥२८॥तस्माध्रुवं बुजेधार्य लिंगंब्र-
ह्मपदामिदं॥ ॥इतिश्रीमद्विशिष्टाद्वैतसिद्धांतरहस्यैकोत्तरशतस्थलाभिज्ञनीलकंठकृते निगमागमसारसं
ग्रहे क्रियासारे द्वितीयोपदशोसमाप्तोजातः॥ ॥श्रीरस्तु॥ ॥शुभमस्तु॥ ॥ ॥७॥७॥७॥७॥७॥७॥

॥श्रीगणेशायनमः॥ ॥त्रितीयोपदेशप्रारंभः॥ ॥स्मृतिन्यायविरोधस्तु द्वितीये विनिवारितः॥परपक्षानपेक्षत्वं
सम्यगेवप्रपंचितं॥१॥श्रुतिविप्रतिषेधश्च सम्यक्पूर्वं परीहृताः॥जीवस्याजन्यतादीनि जीवोपकरणानि च॥२॥
प्रपंचितानि चेदानीं जीवेकरणं बृंहिते॥संहारस्य प्रकारश्च तदवस्थांतराणि च॥३॥ब्रह्मत्वं च तथा विद्याभेदाभेदौ
ततःपुनः॥गुणोपसंहृतिश्चाथ तथैवानुपसंहृतिः॥४॥विद्यातःपुरुषार्थस्य सिद्धिर्विद्याविधिस्तथा॥विधिप्र
भेदावश्यं तेतत्तरंगसहकारणं॥५॥मुक्तिरूपफलस्यापि नियमश्चोदितःकृतौ॥उपदेशे त्रितीयेस्मिन् चिंत्यतेब-
हुयुक्तिभिः॥६॥प्रसंगात्तं किमप्यन्यत्प्रथमं च प्रपंच्यते॥पंचाग्निविद्यामाश्रित्य गतिंदभेदस्य संहृतेः॥७॥जीवो
मुख्यानयप्राणानिंद्रियाणि स्वयं तथा॥मनोविद्याकर्मपूर्वं प्रज्ञाश्च परिगृह्य च॥८॥पूर्वदेहं विहायासौ देहांतरगतः ४२
खलुः॥भूतसूक्ष्मैः परिवृतो याति जीवोनवेत्ति च॥९॥फलं यत्रानुभूयेत तत्र स्युर्भूतमात्रकाः॥इत्येवं तदुपादानमन

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

र्थकमितिद्यतः ॥१०॥ देहांतरसमापत्तौ देहबीजैश्च सूक्ष्मकैः ॥ भूतैश्च संपरिष्वक्तो जीवो रंहति गच्छति ॥११॥ प्रश्नाद्वै-
थादिवाक्योक्ताद्योराद्याश्च निरूपणात् ॥ पंचम्यामाहुतावापइत्यम्भिः परिवेष्टितः ॥१२॥ यातीति गम्यते सर्वैर्वेष्टितः
कथमित्यतः ॥ त्र्यात्मकत्वात्तु भूयस्त्वाद्दूक्ष्पः शुक्लशोणिते ॥१३॥ इतश्च भूतगमने प्राणानां गतिवर्णनात् ॥ निराश्र-
याहि प्राणानां नगतिर्भवतीत्यतः ॥१४॥ प्राणानामग्न्यादिगतिर्न जीवेन सहेति चेत् ॥ न भाक्तत्वात्तदग्न्यादिगमने
चौपचारिकं ॥१५॥ प्रथमेग्नौ द्युलोकाख्ये श्रूयं तेनापइत्यतः ॥ तच्छ्रद्धां जुह्वतीत्येवं श्रवणान्नापइत्यतः ॥१६॥ क-
थं वा तत्र पंचम्यामाहुतावापईरिताः ॥ इतिचेन्न हिता आपः श्रद्धाशब्देन वर्णिताः ॥१७॥ उपपत्तेरन्यथा तद्वाक्यं
नैवोपपद्यते ॥ प्रायोगदर्शनाच्छ्रद्धा वा आपइति तत्र च ॥१८॥ परिष्वक्ताश्च ते जीवा न रंहेयुरतच्छ्रुतेः ॥ इति चेन्नेष्ट-
पूर्तादिकारिणां गतिदर्शनात् ॥१९॥ नच व्याघ्रादिभिरिवाभक्षितानां चदेवतैः ॥ उपभोगः संभवतीत्यतः प्राह त्रसूत्र-
कृत् ॥२०॥ भाक्तं वानात्मजित्वाद्धि तथा दर्शयतीति चेत् ॥ कृतात्ययेनुशयवान्दृष्टश्रुतिभ्योद्धयात् ॥२१॥ तथैतत्तद-
णा। नेपंचश्रुत्यैव प्रतिपादिते ॥ चरंदवरोहोक्तिः कथमत्रेति चेन्नच ॥२२॥ कर्मोपलक्षणार्था साचरणश्रुतिरित्यथ ॥ का-
र्ष्णाजनिः किलाचार्यो मन्यते स्वयमत्र तु ॥२३॥ आचारानर्थक्यमिति न तवस्त्येद्यपेक्षणात् ॥ आचारहीनं न पुनं-
ति वेदा आचारसंघाः किल हेतवस्युः ॥२४॥ आचाराः प्रतिधर्मास्ते शिवपूजादिलक्षणाः ॥ बादरिः केवलं प्राह तथा सु-
कृतदुष्कृते ॥२५॥ इष्टाद्यकारिणां पुंसामपिचंद्रगतिः श्रुतौ ॥ इष्टादिकारिणां चैव किं साम्यं तदकारिणां ॥२६॥ इतरेषां

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि०॥ संयमनेदुःखमप्यनुभूयते॥स्यातामारोहवरोहौचंद्रमंडलइत्यपि॥२७॥वैवस्वतंसंगमनमितिप्राहश्रुतिस्स्वयं॥ सा०
४३ स्मरंतिचैवंयामीयायातनानाचिकेतके॥२८॥अपिचैतेसप्तसंख्यानरकारौरवादयः॥दुष्कृत्यभोगभुक्त्वेनस्मृताः
पौराणिकैःपुनः॥२९॥चित्रगुप्तादयोप्यन्येधिष्ठातारःस्मृताःकथं॥यमस्याधिष्ठातृत्वेतेतितद्व्यापारयतःस्ततः॥३०॥
अविरोधौरौरवादावज्ञातत्रनियामिका॥प्रकृतत्वात्तुतद्विद्याकर्मणोरितिसूत्रितं॥३१॥तुशब्दःपूर्वपक्षस्यनिवृ-
त्तौवर्ततेस्वयं॥इष्टाद्यकारिणांपुंसांचंद्रारोहवरोहणे॥३२॥नस्तःकुतोवेत्थ्ययथासलोकोनेतिवैश्रुतेः॥प्रश्नप्रत्यु
त्तरेवाक्येनश्रूयेतेयतोह्युभे॥३३॥अथैतयोर्नेतिवाक्यादितितत्रैतयोःपथोः॥तद्विद्याकर्मणोरित्येतत्तस्मात्प्रकृ
तत्वतः॥३४॥तेविद्याकर्मणीदेवयानाख्यपितृयानयोः॥प्रकृतेद्वेप्रतिपदोक्तद्यइत्थंविदुरित्विति॥३५॥इष्टापूर्ते
दत्तमितिकर्मतत्राथर्वणने॥विद्ययायेदेवयानेकर्मणापितृयानके॥३६॥पूरूषानेनाधिकृतास्तेषामेषउदाहृ-
तः॥क्षुद्रजंतुस्वरूपोसकृदावर्त्यस्तृतीयकः॥३७॥पंथाभवत्यतोनिष्ठकारिणांचंद्रमंडले॥अरोहणावरोहौद्वौतृ
तीयस्थानकेनच॥३८॥नियमःपंचसंख्यायदेहलाभायकल्प्यतां॥अंतरेणाहुतेःसंख्यानियमंतुतृतीयके॥३९॥
देहप्राप्त्युपलब्धेश्चजायस्वेत्यादिवाक्यतः॥चतुर्विधेमतग्रामेश्रुत्यासंप्रतिपादिते॥४०॥जरायुजांडसंजातस्वेद
जोद्भिज्जलक्षणे॥स्वेदजोद्भिज्जयोस्तत्रग्राम्यधर्मान्विनापिच॥४१॥उत्पत्तिदर्शनान्नैवाहुतिसंख्यायमःपुनः॥ ४३
खल्वेषामितिवाक्येनत्रिविधग्रामवर्णनात्॥४२॥चातुर्विध्यंकथंवास्यादतःप्राहसूत्रकृत्॥वाच्यउद्भिज्यशब्दे

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

नस्वेदजस्यापिसंग्रहः ॥४३॥ भूजलोत्पत्तिसाम्येनस्वेदजोद्भिज्जयोर्द्वयोः ॥ तत्स्वाभाव्यापत्तिरुपपत्तेरन्यस्यना-
न्यथा ॥४४॥ अत्राकाशादिप्रपत्तौ प्राग्व्रीहिप्रतिपत्तितः ॥ संशयः किंदीर्घकालेपूर्वपूर्वसमानता ॥४५॥ उत्ताल्पका
लमितिचतत्रचानियमः पुनः ॥ किंचिन्नियामिकाभावादितिप्राप्तेतदोच्यते ॥४६॥ अल्पकालेनावरोहआव्रीहिप्राप्ति
तत्रच ॥ विशेषवचनाज्जातोवैखल्वित्यादिवाक्यतः ॥४७॥ व्रीह्यादिभावादूर्ध्वंचदुर्निःस्रतिरितिब्रुवन् ॥ पूर्वत्रा
चिरकालत्वंदर्शयत्यतिसंस्फुटं ॥४८॥ जीवांतराधिष्ठितेचव्रीह्यादौश्लेषमात्रकं ॥ तत्रानुशयिनःसम्यग्वर्णयेरन्
कुतःपुनः ॥४९॥ आकाशादौयथाकर्मासंकीर्तनमथांतरा ॥ अभिलापस्तथात्रापिचाभिलापस्यदर्शनात् ॥५०॥ अ
शुद्धमितिचेन्नैवशब्दादेवविधानतः ॥ इतोव्रीह्यादिसंश्लेषमात्रंव्रीह्यादिभावतः ॥५१॥ अनंतरंचरेतःसिग्भावआ
त्मायतेश्रुतौ ॥ मुख्योनरेतःसिग्भावःसंभवत्यत्रवैपुनः ॥५२॥ सिक्तव्यार्थोरजोहृदयोर्व्वनोरेतएवहि ॥ तत्कथंनो
पचरितंपूर्वोक्तंकिलवैपुनः ॥५३॥ तत्तद्भावात्पुमाल्लानानुशयीप्रतिपद्यतो ॥ रेतःसिग्योगएवातोरेतःसिग्भावउ
च्यते ॥५४॥ तद्वद्व्रीह्यादिभावोपिव्रीहिसंश्लेषमात्रकं ॥ योनेःशरीरंरेतःसिग्योगस्यानंतरं क्रियाः ॥५५॥ योनेरधिशा
रीरंचश्रितंतद्यइहादिना ॥ व्रीह्यादिसंश्लेषमात्रेवाक्यतदपियुज्यते ॥५६॥ जीवावस्थाभेदजातमिदानींतुप्रपंच्यते ॥
उपक्रम्यसयत्रस्वपितीत्याद्यामनंतिच ॥५७॥ स्वप्नेजीवोरथादिन् किंसृजत्येवोतपश्यति ॥ स्वप्नस्थानंतृतीयंतुसंध्यं
श्रुतिषुदर्शनात् ॥५८॥ भवेत्संध्योर्ध्वयोर्लोकस्थानयोस्संध्यमुच्यते ॥ तत्रसंध्येसृष्टिरेवसृजइत्याहहिश्रुतिः ॥५९॥ नि

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि० मंतारंचामनंतितत्रकेचनशाखिनः ॥ यद्येषसुप्तेष्वित्यादिकामाःपुत्रादयश्चये ॥ ६० ॥ मायामात्रंतुकार्त्स्न्येनानभि सा०
४४ व्यक्तस्वरूपतः ॥ अनात्माभिनिवेशाच्चाप्यैश्वर्यंतत्तिरोहितं ॥ ६१ ॥ अस्यजीवस्यातएवस्यातांबंधविपर्ययौ ॥ ऐश्व
र्यस्यतिरोधानंदेहसंबंधतोथवा ॥ ६२ ॥ सूचकंचहिवेदोक्तास्तद्विदश्चप्रचक्षते ॥ यदाकर्मसुकाम्येषुस्त्रियंस्वप्नेषुपश्य
ति ॥ ६३ ॥ समृद्धिंतत्रजानीयात्तस्मिन्स्वप्ननिदर्शने ॥ कल्याणंकुंजरारोहेतदन्यत्खररोहने ॥ ६४ ॥ स्वयंस्रष्टुंनार्हती
तिस्वप्नस्त्यैवशुभसूचकं ॥ सुषुप्त्यवस्थाचेदानींसम्यगेवपरीक्ष्यते ॥ ६५ ॥ तस्यस्वप्नस्यचाभावःसुषुप्तमितिकथ्यते ॥
तद्यत्रैतत्सुप्तवाक्येसुप्तोनाडीष्वितीरितं ॥ ६६ ॥ ताभिप्रत्यवसृप्येतिप्रवेशश्चपुरीतती ॥ सतासोम्यहसंपत्तिस्तदेति
समुदीरितं ॥ ६७ ॥ नाड्यादीनिकिमेतानिनिरपेक्षाणिवैपुनः ॥ स्फुटंसुषुप्तिस्थानानिचान्योन्यापेक्षयाकिमु ॥ ६८ ॥
सुप्तेसमुच्चितेषुस्यान्नाडीष्वत्रहितच्छ्रुतेः ॥ नाड्यादीनांचसर्वेषांसुषुप्तिस्थानताश्रुतेः ॥ ६९ ॥ पर्यंकेशेतइतिव-
च्छेतेसातुपुरीतती ॥ तत्समुच्चितमेवेदंस्थानंसुप्तेहिनिश्चयः ॥ ७० ॥ यतःसमुच्चितंस्थानंप्रबोधोस्माच्चनित्यवत ॥
प्रः बोधोनंतरोक्तस्तुचिंत्यतेसुप्तवांस्तुयः ॥ ७१ ॥ सएवोत्तिष्ठतीत्येवमुतान्योवाशरीरके ॥ कर्मशेषाद्यनुष्ठानात्पूर्वेद्युः
कर्मयत्कृतं ॥ ७२ ॥ परेद्युरनुसंधायकर्मण्येषप्रवर्तते ॥ अनुस्मृतेःपूर्वशब्दाद्विधिभ्यःश्चैकएवहि ॥ ७३ ॥ मुग्धोनामा-
स्त्ययंसर्वैर्मूर्छितश्चेतिवर्णितः ॥ चिंत्यतेकिमवस्थस्सचतस्रश्चाप्यवस्थिकाः ॥ ७४ ॥ प्रबोधःप्रथमःस्वप्नःसुषुप्ति ४४
स्तदनंतरं ॥ संपत्तिश्चतुरीयासाजीवस्यैतावत्वर्णिताः ॥ ७५ ॥ नैवजागरितोमुग्धोविषयानीक्षणादिति ॥ निःसंज्ञत्वा-

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

न्नचस्वप्नानूपश्यत्येषततोपिन ॥७६॥ प्राणोऽद्वान्नापिमृतः सुषुप्तानविलक्षणात् ॥ सुप्तः प्रसन्नवदनोनिमी
लितनिजेक्षणः ॥७७॥ तन्मोगध्यमर्द्धसंपत्तिः कर्मशेषेसतिक्षितौ ॥ प्रत्यागच्छेद्वाऽज्ञनसमसतिक्षितिमंडले ॥
॥७८॥ प्राणोष्माणोततस्तत्रनिर्गच्छतइतिस्फुटं ॥ अतएवार्द्धसंपत्तिर्मूर्च्छेतिपरिकीर्तिता ॥७९॥ ब्रह्मस्वरूपमधु
नासम्यगेवोपवर्ण्यते ॥ श्रुतयः संत्युभयथासर्वकामादयोगुणाः ॥८०॥ सगुणत्वेननिर्वाह्यनिर्गुणत्वेनकश्चन ॥ त
द्ब्रह्मोभयलिंगंकिंकिमन्यतरलिंगकं ॥८१॥ स्वतश्चोभयलिंगत्वंपरस्यब्रह्मणोनहि ॥ नह्येकंवस्तुजगतिरूपद्वा
प्यरूपिच ॥८२॥ नास्तितर्हिस्थानतोवापृथ्व्याद्योपाधियोगतः ॥ उपाधियोगतश्चापिनह्यन्यादृशवस्तुनः ॥८३॥ अ
न्यादृश्यः स्वभावस्यान्नस्वच्छः स्फटिकोमणिः ॥ अलक्तकादियोगेनाप्यस्वच्छोभवतिस्वयं ॥८४॥ अस्वच्छतानिवे
शस्यभ्रममात्रतयापुनः ॥ नैवंतथोपाधिभेदाद्भिन्नत्वंब्रह्मणः पुनः ॥८५॥ स्यात्तस्योभयलिंगत्वमितिचेन्नतथाभ
वेत् ॥ तप्रत्युपाधिभेदंचशास्त्रादुक्ताह्यभिन्नता ॥८६॥ अपिचैवंभेदनिंदापूर्वकाभेदवर्णनात् ॥ तस्मान्नोभयलिं
गेस्यादरूपिब्रह्मकेवलं ॥८७॥ तादृक्श्रुतेः प्रधानत्वादन्यच्चोपासनापरं ॥ विवक्षितार्थवत्तन्नेत्येवंतत्रव्यवस्थितिः
॥८८॥ प्रकाशवच्चवैयर्थ्यंतन्मात्रंश्रुतिराहच ॥ दर्शयत्यथयद्वाक्यंस्मरतेयाज्ञवल्क्यके ॥८९॥ अनन्यविषयेकृत्वाम
नोबुद्धिमतींद्रियः ॥ ध्येयआत्मास्थिरोयोसौहृदयेदीपवत्प्रभुः ॥९०॥ एकोणुरात्माभिहितः प्रकाशिह्यतएवहि ॥ सूर्य
कादिवदित्येवमुपमाचोपपद्यते ॥९१॥ एकएवहिभूतात्माभूतेभूतेव्यवस्थितः ॥ एकधाबहुधाचैवदृश्यतेजलचंद्र-

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि॰ वत्॥९२॥नसूर्यकादितुल्यत्वमुपमाग्रहणादिति॥सूर्यादिभ्योपिमूर्तेभ्यःपृथक्भूतंचदूरतः॥९३॥मूर्तेचदृश्यते सा॰
४५ तत्रप्रतिबिंबोदयोपिच॥नात्मामूर्तोनचास्माच्चपृथग्भूताउपाधयः॥९४॥नविप्रकृष्टदेशाश्चसर्वगत्वादभेदतः॥
तस्मादयुक्तोदृष्टांतइतिचेत्नोच्यतेमया॥९५॥युक्तएवहिदृष्टांतःप्रकृतांशोपमायतः॥तद्वृद्धिह्रासभाक्त्वंहिविंद्याज्ज
लगतंहितत्॥९६॥सूर्यस्यप्रतिबिंबंहिजलवृद्धौप्रवर्तते॥ह्रसतीवतथाह्रासेचलनेचलतीवच॥९७॥भेदेचभिद्यत
इवनद्येवेपरमार्थतः॥तथात्वंभास्करस्यास्तितत्वदृष्ट्यावधारय॥९८॥तथैकमेवहिब्रह्मदेहांतर्भावतःस्वयं॥तद्ध
र्मान्वहतीवापिवृद्धिह्रासादिकंतथा॥९९॥दृष्टांतदार्ष्टांतिकयोरविरोधात्समंजसे॥तत्सृष्ट्वेत्यादिवाक्येनब्रह्मणोद
र्शनात्तथा॥१००॥नेतिनेत्यादिवाक्येश्चाप्यतावत्वेहिमूर्तता॥प्रकृतत्वान्निषिध्येतप्रपंचोननिषिध्यते॥१॥ततःप
रिच्छिन्नरूपाम्दूइष्टंब्रह्मकेवलं॥श्रुतिर्वदतिब्रह्मत्वंप्रपंचात्मकमेवतत्॥२॥श्रुतिरव्यक्तमाहेयंनचास्याद्यास्सरंति
च॥अव्यक्तोयमचिंत्योयमित्यादिबहुशःश्रुतौ॥३॥अपिचैवंतमात्मानंध्यानकालेतुयोगिनः॥पश्यंतिश्रुतिरत्रेयंतत
स्तुतश्मितिश्रुतिः॥४॥योगिनस्तंप्रपश्यंतिभगवंतंसनातनं॥प्रकाशादेर्गुणस्यापिब्रह्मणश्चाभिदायथा॥५॥ब्रह्मप्र
पंचयोरेवमभ्यासादैतदात्म्यके॥सामानाधिकरण्यंचसाधयामीदमत्रहि॥६॥नाभेदस्तस्यमुख्यत्वादन्यत्रगुणयोग
तः॥सामानाधिकरण्यंतद्बहुस्यामितिबोधतः॥७॥तथासंकल्पनंनस्याद्बहुस्यामितिरूपतः॥तथाचसृष्टिर्नभवे ४५
दभिदेयमतःखलु॥८॥गुणत्वंनप्रकाशस्यकिंतुब्रह्मस्वरूपता॥विज्ञानमानंदमितितथैवप्रतिपादनात्॥९॥सदृष्टां

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

तोपपन्नस्तद्दृष्टांतोध्यानकर्मणि ॥ अभ्यासादेववक्तव्योगुणोसौब्रह्मणस्त्विति ॥१०॥ यःसर्वज्ञःसर्वविच्चयस्यज्ञान
मयंतपः ॥ तमेवभांतमित्यादौज्ञानकर्तृत्वमुच्यते ॥११॥ भातीतिलट्प्रत्ययेनकर्तृत्वस्यैववर्णनात् ॥ तदैक्षतेत्यादि
वाक्येश्रुतत्वाच्चतथैवहि ॥१२॥ सत्यंज्ञानमनंतंचब्रह्मेत्यत्रातएवहि ॥ अनंतज्ञानपदयोःसामानाधिकरण्यकं ॥१३
अविरुद्धंनुचैवेदमभेदेकिलतद्भवेत् ॥ तथाहिलिंगमितिचतस्मात्सूत्रितवान्मुनिः ॥१४॥ ज्ञाधातोर्ल्युट्प्रत्ययांतोज्ञ
प्त्यर्थोभावसाधनः ॥ नायमत्रज्ञानशब्दस्तथाचेत्प्रत्ययस्वरात् ॥१५॥ आद्युदात्तोभवेदंतोदात्तश्चाधीयतेततः ॥ ज्ञान
मस्यास्तीतितत्रमत्वर्थीयाच्चप्रतीयते ॥१६॥ ज्ञानवद्वचनस्तस्मादंतोदात्तश्रितेस्त्विति ॥ तथाचांतोदात्तलिंगाद्ब्रह्म-
ज्ञानगुणंस्मृतं ॥१७॥ भेदाभेदाभ्युपगमेविरोधइतिचेन्नहि ॥ प्रामाणिकत्वेनतस्यविरोधाभावउच्यते ॥१८॥ यथाहेः
कुंडलमहिःकुंडलंचोभयस्मृतेः ॥ अहिकुंडलयोर्भेदाभेदौब्रह्मप्रपंचयोः ॥१९॥ सच्चत्यच्चाभवदितिचोभयव्यपदेशतः
स यथाप्रकाशाश्रयस्यचातवस्यचवैपुनः ॥२०॥ तदाश्रयस्यसवितुःस्वरूपाभेदकेपिच ॥ तेजस्त्वेनाभेदएवंज्ञेयंब्रह्मप्रपं-
चयोः ॥२१॥ प्रकाशादेर्गुणस्यापिगुणिनोब्रह्मणोयथा ॥ भेदाभेदावेवमेवज्ञेयंब्रह्मप्रपंचयोः ॥२२॥ भेदाभेदौविरुद्धौ-
तौकथंस्वीकुरुतेबुधः ॥ अभेदएवचाप्यस्यसाधनत्वात्समीहितः ॥२३॥ तद्भेदव्यपदेशस्तुकल्प्यतामौपचारिकः ॥ इ
तिचेन्नप्रतिषेधाच्चनेतिनेतिपुनःपुनः ॥२४॥ उपासनार्थहेतुत्वेपादवद्व्यपदिश्यते ॥ कार्षापणचतुर्थांशस्तद्वत्पादःस-
मीहितः ॥२५॥ यन्मानव्यपदेशादितन्नस्थानविशेषतः ॥ प्रकाशभेदःप्रासादगोपुराट्टालभेदतः ॥२६॥ तद्वद्ब्रह्मणएक

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

स्यचाद्यादिस्थानयोगतः ॥ संबंधभेदत्वात्तस्याभेदोपिव्यपदिश्यते ॥ २७ ॥ एवंपरोक्तहेतूंस्तुप्रोन्मथ्यबहुयुक्तिभिः
व्यासःसर्वात्मकत्वस्यसाधकंहेतुमाहहि ॥ २८ ॥ तथान्यत्प्रतिषेधाच्चब्रह्मसार्वात्म्यकंमतं ॥ अनेनसर्वगततायाम
दम्भादिकश्रुतेः ॥ २९ ॥ आयामोव्याप्तिवचनोयावान्वायमितिश्रुतेः ॥ ईश्वरात्फलसंप्राप्तिःसर्वाध्यक्षतयापुनः ॥ ३०
देशकालविशेषाभिज्ञत्वात्कर्मानुरूपतः ॥ कर्मिणांफलदातासौनकर्मान्यक्षनश्वरं ॥ ३१ ॥ श्रुतत्वाच्चेश्वरादेवसर्वाए
षश्रुतेःफले ॥ धर्मंजैमिनिराचार्यःफलदातारमाहहि ॥ ३२ ॥ उपपत्तेःश्रुतेश्चैवयजतेत्यादिदर्शनात् ॥ सचापूर्वा
ख्यव्यापारद्वाराकर्मफलप्रदः ॥ ३३ ॥ कर्मवैचित्र्यतस्तत्रफलवैचित्र्यसंभवः ॥ ईश्वरस्यत्वैकरूप्याद्वैषम्यंनिर्घृणोभ-
वेत् ॥ ३४ ॥ अतोनफलदातृत्वंब्रह्मणस्तूपपद्यते ॥ बादरायणआचार्यःफलमीश्वरतस्त्विति ॥ ३५ ॥ कर्मकारइतृत्वेन
फलदत्वेनचश्रुतेः ॥ योयोयांयांतनुंभक्तःश्रद्धयार्चितुमिच्छति ॥ ३६ ॥ तस्यतस्याचलांश्रद्धांतामेवविदधाम्यहं ॥
सतयाश्रद्धयायुक्तस्तस्याराधनमीहते ॥ ३७ ॥ लभतेचततःकामान्मयैवविहितान्हितान् ॥ इतिगीतासुचोक्तत्वात्फ
लदातामहेश्वरः ॥ ३८ ॥ विज्ञेयंब्रह्मणस्तत्वंप्रमाणादिकतत्वकं ॥ व्याख्यातंतदिदानींतुप्रतिवेदांतमस्तिकिं ॥ ३९ ॥
विज्ञानभेदःकिंनेतिसम्यगत्रविचार्यते ॥ प्रत्ययाःसर्ववेदांताःविज्ञानस्यचतत्पुनः ॥ ४० ॥ नभवेतत्सर्ववेदांतप्रत्य
यंचैकमेवहि ॥ चोदनाद्यविशेषाच्चाप्युपासीतेतिरूपतः ॥ ४१ ॥ गुणभेदाच्चविद्यायानानात्वमितिचेन्नच ॥ एकस्या ४६
मपिविद्यायांगुणभेदोपपत्तितः ॥ ४२ ॥ नषोडशग्रहणतस्तदग्रहणतस्तथा ॥ अतिरात्रक्रतोर्भेदस्तस्माद्विद्यैक्यमे

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

वहि ॥४३॥ साध्यायस्य तथात्वेन समाचारो तथा श्रुतेः ॥ अधिकाराच्च सवक्तत्र तन्नियमो भवत् ॥४४॥ वेदो विद्यैकतो-
वक्ति वैद्यैकत्वोपदेशतः ॥ विद्यैकत्वेपि चान्यत्रोक्त गुणानां तथैक्च ॥४५॥ समाने चैव विज्ञाने उपसंहार एव हि ॥ प्रयो-
जनैक्याद्विज्ञेयो विद्वद्भिर्विधिशेषवत् ॥४६॥ विद्यायास्तत्र नानात्वेत्वं न इत्यादिकश्रुतेः ॥ प्राणस्य कर्तृता तत्र भ्क्कमेता
न्यत्र तन्नहि ॥४७॥ न विभक्तिकृताद्दोषाद्भेदस्यादविशेषतः ॥ तथैवोद्गीथविद्येति सा समाख्याविशेषतः ॥४८॥ वरो
वरीयस्यादिवन्नवाप्रक्रमभेदतः ॥ अविशिष्टेति न ज्ञेयं विद्यैकत्वं तदत्र चेत् ॥४९॥ तदुक्तं वर इत्यादि सति प्रक्रमभेदः
के ॥ संज्ञाया दुर्बलत्वेन संज्ञैकत्वं तदत्र च ॥१५०॥ तत्सुप्रसिद्ध मेदेषु ह्यग्निहोत्रादिकर्मसु ॥ अस्ति कारकसंज्ञैक्यमभि
धातत एव हि ॥५१॥ व्याप्तेरोमित्यादिकस्य ह्युद्गीथं तद्विशेषणं ॥ सर्वाभेदात तदन्यत्र चानेदाद्याइवे गुणाः ॥५२॥ न हि प्रि
यशिरस्त्वाद्युपचयापचयो हि तौ ॥ भेदे संभवतस्तौ च स भेदो नोपपद्यते ॥५३॥ इंद्रियेभ्यः पराह्यर्थाः अर्थेभ्यश्च परं मनः ॥
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः ॥५४॥ महतः परमव्यक्तमव्यक्तात्पुरुषः परः ॥ पुरुषान्न परं किंचित्सा काष्ठा सा
परा गतिः ॥५५॥ पुरुषस्तु परो ध्येयो नान्ये तत्रेंद्रियादयः ॥ ध्यातुः प्रयोजनाभावात्पुरुषे तु प्रयोजनं ॥५६॥ इतश्च पुरुषो ध्ये
य आत्मशब्दश्रुतेरपि ॥ गृह्यते पर एवात्मा तत्रात्मा वा इति श्रुतौ ॥५७॥ यथा सदेव सोम्येति तद्वदुत्तरवाक्यतः ॥ अन्वया
दिति चेद्ब्रह्मपरं स्यादवधारणात् ॥५८॥ बृहदारण्यशांडिल्यविद्या वाजसनेयिनो ॥ समान एवं चाभेदान्मनोमयगुणादिमत् ॥
॥५९॥ संबन्धादेवमन्यत्राप्यध्यात्मं चाधिदैवते ॥ तस्यैतस्य तदेवेति श्रुतिर्दर्शयतीश्वरं ॥१६०॥ वीन्यासे भृतिरेवं च ह्युनिवे

CC.0- Jangamwadi Math Collection. Digitized by eGangotri

क्रि० शादिभूतयः॥तत्रतानोपसंहार्य्याअधिदैवैक्यभूतयः॥६१॥तांडिनांब्राह्मणेचापिविद्यापुरुषसंज्ञका॥उक्ताःकेचनध सा०
६७ र्माश्चैवतैत्तरीयकशाखिना॥६२॥तथापुरुषयज्ञंचतस्यैवंविदुषश्रुतौ॥तैत्तरीयोपसंहार्याधर्मायइतरत्रये॥६३॥किं
वानैवोपसंहार्याइत्येवंविषयेसति॥इतितेषामनाम्नानान्नोपसंहरणंभवेत्॥६४॥मंत्राविद्याद्यर्थभेदादाभिचारिकः
कर्मणि॥विनियुक्ताःप्रवर्ग्यादौनोपसंहार्यतातततः॥६५॥अश्विचाश्वीयरोमाणिरूपेयंतांडिनांश्रुतिः॥हानंदुष्कृतमा
त्रस्यज्ञानिनांप्रतिपादितं॥६६॥अथकाषीतकीश्रुत्यामुखेसुकृतदुष्कृते॥येज्ञानिनांतयोर्हानेसुकृतंज्ञातयःप्रियाः
॥६७॥उपयंत्यप्रियाःपापमितितत्रैववर्णितं॥हातमुक्तंचित्तयोरेवविभागेनप्रियाप्रिये॥६८॥उपायनंचयत्रस्याध्या
नमेवततःश्रुतौ॥नोपायनंतत्ररूपायनंसन्निपतेन्नवा॥६९॥तत्रचश्रवणाभावात्सन्निपातोनहीतिचेत्॥तथाविद्यां
तरत्वाच्चनोपसंहारएवचेत्॥७०॥केवलायांचापिहानाउपायनमिदंभवेत्॥तच्छेषत्वाध्यानवाक्यंशेषस्तूपायनंपु
नः॥७१॥कुशानामविशेषेणवानस्पत्यत्वसंभवे॥औदुंबराःकुशाश्चेतिवाक्यशेषाद्यथापुनः॥७२॥छंदतस्तूपधान्यादि
साहस्यप्रतिपादनम्॥तथाहन्येसांपरायेकर्तव्यविरहादिति॥७३॥विदुषांछंदतश्चोभयाविरोधात्तथैवच॥सांपरा
येप्यध्वनिवाहानंसुकृतपापयोः॥७४॥ननुस्यात्सांपरायेपिहानंसुकृतपापयोः॥अनर्थितागतिस्साहिसंकल्यातः
त्कृतेपुनः॥७५॥सर्वगत्वेनचब्रह्मप्राप्तेर्गत्यनपेक्षणात्॥अंतरेणगतिंचात्रब्रह्मप्राप्तेरसंभवात्॥७६॥सार्थागतिश्चो ६७
भयताप्यन्यथाहिनिरोधकः॥तल्लक्षणार्थोपलब्धेर्गतेरर्थस्सुसंगतः॥७७॥विज्ञानानांचसर्वेषांदेवयानागतामता॥

CC.0- Jangamwadi Math Collection. Digitized by eGangotri